# श्रीरामगीता

वेदान्तरत्न-पण्डितत्र्यंबकाभिजनशुक्लोपाह्व-
बालकृष्णशास्त्रिणा विरचितबाल-
मधुकरीव्याख्योपेता ।

सा च

श्रीमत्सुरतपुरनिवासि-महोदारठाकुरदास-
गुलाबदासमहाभागकृतवित्त-
साहाय्येन प्रकाशिता ।

शके १८६१

मूल्यम् १२ आणकाः ।

२(१४९)
संस्कृत १५२

२०७१/संस्कृत/१५२
28152

ॐ

# श्रीरामगीता

वेदान्तरत्न पण्डितत्र्यंबकाभिजनशुक्लोपाह्व-
बालकृष्णशास्त्रिणा विरचितबाल-
मधुकरीव्याख्योपेता ।

मुम्बय्यां निर्णयसागरमुद्रणालये मुद्रापिता ।

सा च

श्रीमत्सुरतपुरनिवासि-महोदारठाकुरदास-
गुलाबदासमहाभागकृतवित्त-
साहाय्येन प्रकाशिता ।

प्रथमावृत्तिमुद्रितपुस्तकानि १०००

( सर्वेऽप्यधिकारा राजनियमानुसारेण सम्पादकाधीनाः सन्ति )

शके १८६१

मूल्यम् १२ आणकाः ।

प्रकाशकः—बालकृष्णशास्त्री शुक्ल, श्रीक्षेत्र त्र्यंबकेश्वर,
गंगेचे कांठीं, घर नं. ४२८.

प्रिंटरः—रामचंद्र येसू शेडगे, निर्णयसागर प्रेस,
२६-२८ कोलभाट स्ट्रीट, मुंबई नं. २.

ने. रा. [illegible] शास्त्री [illegible] यांना ग्रंथकर्त्याकडून समर्पण

श्रीत्र्यंबकेश्वराय नमः

# किञ्चिन्निवेदनम्

अयि महाशयाः श्रीत्र्यंबकेश्वरकृपया सानन्दं किञ्चित् निवेदयामि मया यथामति जिज्ञासुजनसौलभ्याय सरलसंस्कृतवाङ्मयी बालमधुकरीनाम्नी रामगीतायाष्टीकाऽकारि । तथापि—

आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ॥
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥ १ ॥

इति महाकविकालिदासोक्त्यनुसारेण मदीयमपि चेतः एतत् पुस्तकं पण्डितप्रवरेभ्यः दर्शयितुमुत्कण्ठितमासीत् । तथाचास्मत्परिभ्रमणे ये ये खलु सरस्वतीकृपाकटाक्षपात्रा विद्वांसः सममेलयन्, तेषां दर्शनेनैव पवित्रीकृतोऽहमिदं पुस्तकमदर्शयम् तेभ्यः । तैश्च महाभागैर्निजकार्याणि दूरीकृत्येदं पुस्तकं व्यलोकि । स्वाभिप्रायाविष्करणेन च पुस्तकमुद्रणेच्छा प्रादर्शि । तेनैव प्रोत्साहितोऽहं प्रायतम् । ईशकृपया श्री १०८ मण्डलेश्वरपरमहंसपरिव्राजकवर्य-श्रीस्वामिमुरलीधरानन्दयतिवर्यैः प्रेरिता दानशौण्डाः श्रीमन्तः धर्मपरायणाः सुरतपुरनिवासिनः ठाकुरदासगुलाबदासमहाशया इमां बालमधुकरीटीकां लोकहितार्थं प्राकाशयन् । इति ते विज्ञाननौकर्णधाराः पण्डितमण्डना विद्वांसः स्वाभिप्रायाऽऽविष्करणैर्मदुपरि कृतप्रसादाः । ठाकुरदासमहाभागाश्च धन्यवादार्हाः सन्ति । इति निःसन्देहं ब्रूमः । तथा च पुस्तकान्वेषणे मुद्रणे च यैः सहृदयैः सुहृद्वर्यैः साहाय्यमकारि व्यधायि चायासः

तेषामुपकारभारान् वहामि । अस्मिन् पुस्तके मदीयानवधानतया यानि स्खलितानि वाचकानां दृष्टिपथमवतरिष्यन्ति, तानि मह्यं पत्रद्वारा अनुकम्पया निवेदयितव्यानि । तानि चाग्रिमावृत्तिमुद्रणावसरे दूरीकरिष्यामः

इति शम्

विदुषां वशंवदः

श्रीक्षेत्रत्र्यंबकाभिजनः शुक्लोपाह्वो बालकृष्णशर्मा

# प्रस्तावना ।

श्रीरामतापिन्यां माण्डूक्य इव श्रीरामचन्द्रात्मकं ब्रह्म विश्वतैजसप्राज्ञतुरीयात्मना विभक्तम् "सदारामोऽहमस्मीति तत्त्वतः प्रवदन्ति ये। न ते संसारिणो नूनं राम एव न संशयः ॥" इत्यद्वितीयश्रीरामचन्द्र एव परमार्थ इति तत्प्रतिपादितं दृष्ट्वाऽद्वैतवाद एव श्रीरामतापिनीमूलायाः श्रीरामगीताया अपि तात्पर्यमिति विशदमवगम्यते । अद्वैतवादे हि भक्तिमार्गोऽपि कर्ममार्गविशेष एव, यो हि— "मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।" इति ज्ञानमार्गसाधनमेव मन्यते । न तु साक्षात् मोक्षसाधनमिति । अमुमेवार्थं श्रीरामगीतापि—

विज्ञानमेतदखिलं श्रुतिसारमेकम् वेदान्तवेद्यचरणेन मयैव गीतम् ।
यः श्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषु भक्तिः ॥

इति प्रतिपादयति । अन्ते "मद्रूपमेति" सोऽहंभाव एव केवलचिद्रूपताभिप्रायेण मन्यते, नतु तत्साधर्म्यमात्रम् । अत एव—

मकारमप्यात्मनि चिद्घने परे विलापयेत् प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमत् विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥

इति केवलचिद्रूपत्वमेव वस्तु सत् प्रतिपाद्यते । अद्वैताभिमताऽहमर्थाऽनात्मत्वम्, सर्वस्य प्रपञ्चस्य मृषात्मत्वम्, ज्ञानमात्रमोक्षसाधनत्वम्, तत्त्वमस्यादिमहावाक्यलाक्षणिकत्वमित्यादयोऽर्थाः सर्वेऽपि श्रीरामगीतायाम्—

विकल्पमायारहिते चिदात्मकेऽहंकार एषः प्रथमः प्रकल्पितः ।
अध्यास एवात्मनि सर्वकारणे निरामये ब्रह्मणि केवले परे ॥
इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेति विभावयन्मुनिः ।
निराकृतत्वात् श्रुतियुक्तिमानतो यथेंदुभेदो दिशि दिक्भ्रमादयः ॥
यदि स्म नष्टा न पुनः प्रसूयते कर्ताहमस्मीति मतिः कथं भवेत् ? ।
तस्मात् स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥
प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ।
संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत् ॥

इत्यादि वचनैः संगृह्यन्ते । जीवेश्वरपरलोकादि जगन्मिन्थ्यात्ववादेऽपि केवलाऽद्वैतिनो न नास्तिकाः, यतो यदस्ति ब्रह्म, न तत् नास्तीति ते मन्यन्ते, यत्तु नास्ति, तत् नास्तीति वादो हि वस्तुस्थित्यभिधानात् आस्तिकवाद एव । त एव हि नास्तिका नाम, ये यत् नास्ति, तदस्तीति यदस्ति, तन्नास्तीति च मन्यन्ते । अद्वैतिनस्तु यदुपलभ्यते साधारणैः, तन्मिथ्येति, यच्च नोपलभ्यते तैः, केवलं वेदान्तसंस्कृतान्तःकरणैरेवोपलभ्यते तत् तत्तथ्यमिति मन्वानाः कथं नास्तिका नाम? व्यक्तं चैतत् श्रीरामगीताध्ययनमात्रतः सर्वैरपि विज्ञायेत । मन्ये श्रीरामगीतां मनसि निधायैव श्रीनारायणसरस्वत्यः शारीरकमीमांसाभाष्यवार्तिके स्वीये सर्वत्राद्वितीयाखण्डपरमात्मानं श्रीरामचन्द्ररूपेणैवानुसन्दधते । अद्वैतप्रक्रियाः सर्वा अपि सूक्ष्मरूपेण तत्र तत्र श्रीरामगीतायां सङ्कलिताः समीचीनं विवरणं विना तु नानुसन्धातुं पार्यन्ते, इति किमपि विवरणं विस्तीर्णं विना श्रीरामगीताया माहात्म्यं प्रसन्नगाम्भीर्यं च न कैरपि ज्ञातुं पार्यते ।

वेदान्तरत्नपण्डितप्रवरा श्रीबालकृष्णशुक्लमहोदयाः श्रीत्र्यम्बकक्षेत्रवास्तव्या अतिगभीरस्यातिसरलस्याद्वैत्यभिमतसर्वप्रक्रियाजालपरिपूर्णस्य सर्वात्मनाद्वैतसिद्धान्तरहस्यानामतिसूक्ष्माणां पण्डितप्रवराणामप्यनुसन्धेयानां दुरूहाणां सङ्कलनेनापेक्षितांशमात्रसंग्रहेण च विवरणस्य बालमधुकरीनाम्नः स्वीयपाण्डित्यातिशयानुगुणस्य बहुतरपण्डितप्रवरानुमोदितस्य च विरचनेन प्रकाशनेन च नितरामधमर्णा अद्वैतसंप्रदायाचार्याणाम्, पण्डितप्रवराणाम्, आस्तिकसमाजस्य च । विश्वसिमि विवरणस्यास्य यथासंप्रदायमध्ययनेनाऽद्वैतविद्यार्थिनः विशेषत उपकृता भविष्यन्तीति ।

इति सुधीजनविधेयः

**अनन्तकृष्णशास्त्री.**

महामहोपाध्यायः

श्रीत्र्यंबकेश्वराय नमः

# रामगीताबालमधुकरीटीकास्थविषयाणां अनुक्रमणिका ।


| श्लो० | विषयाः | पृष्ठाङ्काः |
|---|---|---|
| १ ततो जगन्मंगलेति | उपोद्घातपूर्वकं ग्रंथकर्तुः मंगलं विद्वत्प्रार्थना च मंगलमयरामचंद्रस्य चरित्रादर्शवर्णनम् । | १–२ |
| २ सौमित्रिणा– | काम्यकर्मणः उभयतोऽपि बंधकत्वं नृगवृत्तान्तकथनपूर्वकं दर्शयति । | ३ |
| ३ कदाचिदेकान्त– | लक्ष्मणस्य गुरुशरणता । | ४ |
| ४ त्वं शुद्धबोध– | गुरोर्माहात्म्यं चेश्वराभिन्नत्वं तस्य सर्वात्मत्वं त्रिकालाबाधितज्ञानस्वरूपत्वं इत्यादीनां विषयाणां सविस्तरतो विवेचनम् । | ५–६ |
| ५ अहं प्रपन्नोस्मि | लक्ष्मणस्य श्रीरामं प्रति ज्ञानोपदेशप्रार्थना । | ६–७ |
| ६ श्रुत्वाऽथ | अज्ञानोपशमाय रामस्य लक्ष्मणं प्रति ज्ञानोपदेशकथने प्रारंभः । | ६–७ |
| ७ आदौ स्ववर्णा– | नित्यनिष्कामकर्मभ्यः संस्कारपूर्वकचित्तशुद्धिः ततश्च शमाद्युत्पत्तिः ततश्च गुरूपसत्तिः इत्यादिविषयाणां वर्णनम् । | ७–८ |
| ८ क्रिया शरीरोद्भव– | जन्मकर्मरूपसंसारस्य सांतत्यविवेचनम् । | ८–९ |
| ९ अज्ञानमेव | संसारस्य मूलकारणं अज्ञानं तन्निरासाय सम्यक् ज्ञानस्यैव अपेक्षा नान्यस्य । | |
| १० नाज्ञानहानिः | ज्ञानाभावेऽज्ञानजन्यं रागादि न विरमतीत्यतः ज्ञानविचाररतो भवेत् इति विचारः । | १० |
| ११ ननु क्रिया | समुच्चयवादिपक्षमंडनम् । | १०–११ |

| श्लो० | विषयाः | पृष्ठाङ्काः |
| --- | --- | --- |
| १२ कर्माऽकृतौ | समुच्चयवादस्थापनपूर्वकं समुच्चयवादखण्डनम् । | १०–११ |
| १३ न सत्य- | समुच्चयवादिमतोपन्यासः तद्विवेचनं कर्ममीमांसामतविवेचनम् । | १२ |
| १४ केचिद्वदन्ति | कर्ममीमांसामतखण्डनं समुच्चयवादनिरासश्च । | १३ |
| १५ विशुद्धविज्ञान- | ब्रह्मणि वृत्तिव्याप्तिविचारः कर्मसमुच्चयनिरासे कारणं च । | १४ |
| १६ तस्मात्त्यजेत् | ज्ञानकर्मणोर्विरोधेन कर्मसमुच्चयाभावः इन्द्रियाणां सोपपत्तिकविवेचनपूर्वकनिगृहीतेंद्रियोऽऽत्मानुसंधानवान् भवेत् । इति विवेचनम् । | १५ |
| १७ यावत् शरीरादिषु | रागिविरागिभेदेन कर्मणां कर्तव्यताविचारः । | १६ |
| १८ यदापरात्मात्म- | आत्मज्ञाने सति अवश्यं मायानिवृत्तिर्भवति इत्यस्य विवेचनम् । | १७ |
| १९ श्रुतिप्रमाण | श्रवणमनननिदिध्यासजनितज्ञानेन बाधिताऽविद्या न पुनर्जायते श्रवणादीनां व्याख्या उपपत्तिश्च । | १८ |
| २० यदि स्म | आवरणविक्षेपविवेचनपूर्वकं अविद्यानिर्वचनं तन्निरासश्च तस्मात् केवलविद्यैव मोक्षसाधनम् । | १९–२० |
| २१ सा तैत्तिरीय- | उक्तार्थे सप्रपञ्चं श्रुतिप्रमाणप्रदर्शनम् । | २०–२१ |
| २२ विद्यासमत्वेन | कर्तृत्वाकर्तृत्वरूपकारणभेदात् कर्मज्ञानयोः स्वरूपतो भेदप्रदर्शनवत् फलप्रयुक्तवैषम्यं तयोर्दर्शितम् । | |
| २३ सप्रत्यवायो | अज्ञस्यैव कर्माऽकरणे प्रत्यवायः न ज्ञानिनः इति विवेचनम् । | २२ |
| २४ श्रद्धान्वितः | साधनचतुष्टयसंपन्नस्य गुरुप्रसादेन महावाक्यात्प्रत्यक्षज्ञानं जायते इत्यस्य विषयस्य पूर्वपक्षसमाधानपूर्वं विवेचनम् । | २३–२४ |

| श्लो० | विषयाः | पृष्ठाङ्काः |
| --- | --- | --- |
| २५ आदौ पदार्थावगतिः | पदार्थज्ञानपूर्वकत्वात् वाक्यार्थबोधस्य महावाक्यबोधाय पदत्रयार्थविवरणम् । | २४–२५ |
| २६ प्रत्यक्परोक्षादि- | जीवात्मपरमात्मनोर्विरुद्धधर्मनिरासपूर्वकं तयोर्लक्षणया चिदात्मैकताविवरणम् । | २५ |
| २७ एकात्मकत्वात् | विस्तरतो लक्षणात्रयविवेचनम् । | २६–२७ |
| २८ रसादि- | सविस्तरं स्थूलशरीरविवरणम् । | २८ |
| २९ सूक्ष्मं मनो | सोपपत्तिकं सूक्ष्मशरीरविवरणम् । | २९–३० |
| ३० अनाद्यनिर्वाच्यं | कारणशरीराविद्यामायाविषये शंकासमाधानपूर्वकं विवेचनम् । | ३१–३२ |
| ३१ कोशेष्वयम् | पंचकोशविवेचनम्, चार्वाकादिनानावादिनाम् आत्मविषये मतप्रदर्शनपूर्वकं तद्विषये वेदांतमतप्रदर्शनम् । | ३३–३४ |
| ३२ बुद्धेस्त्रिधा | जाग्रदाद्यवस्था अपि बुद्धिधर्मा इत्यस्य विवेचनम् । | ३४–३५ |
| ३३ देहेन्द्रिय- | संसारमूलभूतवृत्तेर्विवेचनम् । | ३५–३६ |
| ३४ नेतिप्रमाणेन | अथात आदेशो नेति नेति इति श्रुतिप्रमाणेन जगन्मिथ्यात्वनिश्चयात् आत्मानुभवपूर्णो ज्ञानी विचरति । | ३६ |
| ३५ कदाचिदात्मा | आत्मनित्यत्वविचारः सर्वक्रियाराहित्यं च । | ३७–३८ |
| ३६ एवंविधे | सच्चिदानंदघने परमात्मनि अज्ञानेन दुःखमयप्रपञ्चप्रतीतिर्भवति इति विचारः । | ३८–३९ |
| ३७ यदन्यदन्यत्र | अध्यासस्वरूपकथनम् । | ३९ |
| ३८ विकल्पमायारहिते | आत्मनि प्रथमं अहंकारकल्पितजगदध्यासः । | ३९ |

| श्लो० | विषयाः | पृष्ठाङ्काः |
|---|---|---|
| ३९ इच्छादि-रागादि- | बुद्धिनिष्ठ एव जीवस्य संसारः नात्मनिष्ठः इत्यस्य कथनम्। | ४१–४२ |
| ४० अनाद्य-विद्यो- | जीवात्मनः स्वरूपकथनपुरःसरं प्रतिबिंबपक्ष-विचारः। | ४२–४३ |
| ४१ चिद्बिंब-साक्षात् | बुद्ध्यात्मनोः परस्पराध्यासात् परस्परधर्मभानं भवति इत्यस्य सोपपत्तिकं विवेचनम्। | ४४–४५ |
| ४२ गुरोः स-काशात् | आत्मोपलब्धिस्थानविचारपूर्वकं जगदुदासीनो ज्ञानी भवति इति विचारः। | ४५–४६ |
| ४३ प्रकाश-रूपो | आत्मनः स्वप्रकाशकत्वस्य विवरणम्। | ४६–४७ |
| ४४ सदैव-मुक्तो | उपाधिविवर्जितात्मस्वरूपविवेचनम्। | ४७–४८ |
| ४५ एवं सदा-त्मानं | सततं नित्यानित्यविचारेण जनितसम्यक्ज्ञानं अविद्यां दूरीकुर्यात् असति प्रतिबंध इति विवेचनम्। | ४८–४९ |
| ४६ विविक्त आ-सीन | अष्टांगयोगेन इतिकर्तव्यताबोधनम्। योगस्य अष्टांगानां विवरणम्। | ४९–५१ |
| ४७ विश्वं यदे-तत्परमार्थ-दर्शनं | समाधिनिष्ठस्य योगिनः जगल्लयप्रकारप्रदर्शनम्। | ५१–५२ |
| ४८ पूर्वं स-माधेः | समाध्यवस्थायाः प्राक् जगदोंकारमात्रचिन्तन-प्रकारः। | ५२–५३ |
| ४९ अकार-संज्ञः | ॐकारावयवभूताकारोकारमकाराणां विवेचनम्। | ५३–५४ |
| ५० विश्वं त्व-कारं | ईश्वरहिरण्यगर्भविराड्प्राज्ञतैजसविश्वादीनाम्। | ५४–५५ |
| ५१ मकारम-प्यात्मनि | तत्तदवस्थादीनाम् च प्रणवावयवरूपत्वविवेचनम्। | ५५ |

| श्लो० | विषयाः | पृष्ठाङ्काः |
|---|---|---|
| ५२ एवं सदा जात | विषयसुखोपलब्धौ न तद्विषयसुखं किंतु आत्मसुखं सकलकामोपरतौ ज्ञानिनो आत्मसुखानुभवः इत्यस्य विवेचनम् । | ५५–५६ |
| ५३ एवं सदाऽभ्यस्त– | योगिनो भक्तस्यैव भगवद्दर्शनम्, अत्र यमनियमादियोगाङ्गानाम् विवेचनम् । | ५६–५७ |
| ५४ ध्यात्वैवमात्मानम् | प्रारब्धकर्मज्ञानयोर्विरोधाभावात् यावत् प्रारब्धं ज्ञानिनो देहावस्थितिः प्रारब्धभोगान्ते ब्रह्मणि लय इत्यस्य विवेचनम् । | ५७–५९ |
| ५५ आदौ च मध्ये | संसारस्यादिमध्यावसानेषु दुःखदत्वप्रतिपादनम्, सुखोपलब्धिस्तु आत्मत एव इत्यस्य विषयस्य विवरणम् सर्वात्मभूतमात्मानम् भजेत् । | ५९–६० |
| ५६ आत्मन्यभेदेन | स्वाभेदभावनया परमात्मानं भावयन् ज्ञानी ब्रह्मण्येकतां प्रतिपद्यते इति सदृष्टान्तम् कथनम् । | ६१–६२ |
| ५७ इत्थं यदीक्षेत | प्रारब्धवशात् ज्ञानिनां भिन्नभिन्नव्यवहारेऽपि जगति न क्वापि सत्यत्वभ्रान्तिरवतिष्ठते इत्यस्य विवेचनम् । | ६२–६३ |
| ५८ यावन्न पश्येदखिलं | सर्वं जगत्परमात्मस्वरूपं यावन्नानुभवति तावत् भगवदुपासनापरो भवेत् साधकः एतत्प्रसंगेन परापरभक्तेर्विवेचनम् । | ६३–६४ |
| ५९ रहस्यमेतत् | उक्तज्ञानस्य श्रुतिसंमतत्वकथनं तदालोचकस्य च सकलदुरितसंक्षयो भवति इति कथनम् । | ६५ |
| ६० भ्रातर्यदीदं | आशीर्वादपूर्वकं दार्ढ्याय पुनः जगन्मिथ्यात्वकथनम् । | ६५–६६ |
| ६१ यः सेवते | सगुणनिर्गुणोपासकविवेचनम् उपासकस्य लोकपावनत्वकथनं च । | ६६–६७ |
| ६२ विज्ञानमेतदखिलं | एतद्ग्रन्थार्थालोचनासमर्थस्य केवलं पाठमात्रतो कृतार्थता लभते इति कथनम् । | ६७–६८ |
| | टीकाकर्तुः अन्तिममंगलम् | ६८ |


विद्वद्वर्याणां अभिप्रायावलिः ग्रंथान्ते

इति शम्

श्री

पंचवटीस्थकैलासमठोद्घाटित-श्रीमद्धृदयानंदपाठशालाकार्यार्थं
प्रथमावृत्तिमुद्रितसहस्रपुस्तकानि समर्पितानि



श्री १०८ मण्डलेश्वर परमहंस परिव्राजकवर्य मुरलीधरानंद महाराज
कैलासमठ पंचवटी

टिळक प्रथम ... १ ...

श्रीगणेशाय नमः

# श्रीरामगीता ।

श्रीत्र्यंबकेश्वराय नमः

इह खलु जगति मानवानां अन्तिमसाध्यं जीवब्रह्मैक्यज्ञानेन विविधजन्मसंसारोपरतिपूर्वकपरमानंदावाप्तिः । अतः तद्विज्ञानार्थं परमभक्तो लक्ष्मणो भगवन्तं भक्तानुग्रहाय धृतावतारं लीलयैव कृतरिपुविनाशं जानकीजानिं घनश्यामं श्रीरामं शरणं गत्वा सकलजीवनिकायहितायैव प्रश्नं पप्रच्छ । भगवान् रामस्तु अविद्योपशामकं ससाधनं ज्ञानमुवाचेतीमं रामगीतावृत्तान्तं व्याचिख्यासुरहं शिष्टाचारानुमितश्रुतिबोधितमिष्टदेवतानमस्कारलक्षणं मङ्गलं ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमुपनिबध्नामि ।

(वन्दे)नौमि श्रीत्र्यम्बकं देवं भालचन्द्रं च सद्गुरुम् ॥ (च सदाशिवं)
शंकरं पितरं टीकां कुर्वे मधुकरीमहम् ॥ १ ॥
अल्पज्ञत्वाच्च मे विद्यालेशमात्रेण किं भवेत् ॥
शुभा मधुकरी व्याख्या रामगीतामहोदधेः ॥ २ ॥ सुधांबुधेः
न भवेदित्युदासीनं पूर्वव्याख्याऽवलोकनात् ॥
पूर्वाचार्यान्नमस्कृत्य भृशमुत्साहितं मनः ॥ ३ ॥
पूर्वटीकाभ्य एवास्यां संगृहीतानि कानिचित् ॥
पदानि तस्मान्नामास्यै कृतं मधुकरीति च ॥ ४ ॥
संक्षेपात्पूर्वटीकानां मंदबुद्धेरबोधतः ॥
सुखबोधाय बालानां व्याख्यातुं प्रयते ह्यहम् ॥ ५ ॥
न विद्वत्परितोषाय यतेऽल्पज्ञतया मम ॥
तथापि प्रार्थये चैतान् प्रमादानां क्षमापने ॥ ६ ॥
विलोकयन्तु विद्वांसः कुतुकेन विमत्सराः ॥
प्रयत्नं प्रथमं मेऽद्य सदोषमपि नूतनम् ॥ ७ ॥

उपलभ्येत नावीन्यं इहापि खलु मोददम् ॥
नास्वादिताश्च पृथुकाः रमेशेन द्विजस्य किम् ॥ ८ ॥
शूर्पवत् सन्त्यजन्त्वाशु दोषान् भो विबुधोत्तमाः ॥
गुणांश्च मे प्रगृण्हन्तु हंसा इव पयोऽम्बुनः ॥ ९ ॥
इति संप्रार्थ्य विबुधान् टीकां कर्तुं समारभे ॥
श्रीशः प्रचोदयात् बुद्धिं याचे तं प्रति मङ्गलम् ॥ १० ॥

अस्य ग्रंथस्य उमामहेश्वरसंवादरूपत्वात् भगवान् त्र्यंबकेश्वरो रामलक्ष्मणसंवादमुखेन परतत्त्वमुपदेष्टुमाह—

**ततो जगन्मंगलमंगलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥**
**चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्यैरभिसेवितं यथा ॥ १ ॥**

तत इति । जगन्मंगलमंगलात्मना । जगतां यानि मंगलानि आनंदाः तेषामुपजीव्यभूतं मंगलमानन्दः स एव ब्रह्मानंदः आत्मा मूर्तिः स्वरूपं यस्य तेन "एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः, "मंगलानां च मंगलम्" इति स्मृतेश्च । अथवा जगतः स्थावरजंगमात्मकस्य विश्वस्य यत् मंगलं सुवृष्ट्यादिना ईतिराहित्यं नाम सर्वेषां कल्याणं तस्यैव मूलभूतं यन्मंगलं सच्चिदानंदस्वरूपं ब्रह्म आत्मा स्वरूपं यस्य तेन । रामेण रमन्ते योगिनो यस्मिन् स रामः तस्य यत् अयनं मार्गः श्रीरामोन्मुखप्रवृत्तिकरः तस्मिन् प्रवर्तिकां कीर्तिं रावणवधादिजां भक्तस्य रामायणस्थरामकीर्तिश्रवणेन रामरूपब्रह्मोन्मुखवृत्तिनिर्मात्रीमित्यर्थः । विधाय ततः सीतारूपमायां रजकापवादात् लोकसंग्रहार्थं त्यक्त्वा अनन्तरं रघुषु उत्तमो रामः पूर्वाचरितं पूर्वैः स्वपूर्वजैः रघुदिलीपादिभिः आचरितं यथान्यायप्रजापालनादिभिः, तथा च सत्कथाश्रवणादिभिः कृतं यथा अन्यै राजर्षिवर्यैः राजानश्च ते ऋषयश्च प्रभुत्वे सति सूक्ष्मतमार्थनिरीक्षणसमर्थत्वं राजर्षित्वं इत्युक्तत्वात् जनकादिभिः अभिसेवितं अनुष्ठितमाचरितं चचार कृतवान् इत्यर्थः ॥ १ ॥

उपोद्घाताय कथा प्रस्तूयते—

**सौमित्रिणा पृष्ट उदारबुद्धिना**
**रामः कथाः प्राह पुरातनीः शुभाः ॥**

राज्ञः प्रमत्तस्य नृगस्य शापतो
द्विजस्य तिर्यक्त्वमथाह राघवः ॥ २ ॥

सौमित्रिणेति ॥ उदारबुद्धिना उदारा, दानशीला क्षत्रियस्य सहजशूरत्वमिव दानशूरत्वमपि प्रसिद्धमिति भावः। बुद्धिर्यस्य तेन यद्वा उदारा गुरुदेवविश्वासलक्षणा महागुणवती बुद्धिर्यस्येति प्राञ्चः । अथवा उदारा शमादिषड्कसंपत्तिसंपन्ना बुद्धिर्यस्य अग्रिमश्लोके स्वेनैव गुरूपसदनकरणात् तत्पूर्वसाधनसंपन्नत्वम् अवश्यमभ्युपेयमिति भावः । अतः शमादिसाधनसंपन्नबुद्धित्वमुक्तमित्यर्थः। सौमित्रिणा तस्य सुमित्रापुत्रत्वेन अग्निप्रसादलब्धत्वं सूचितं श्रीरामभक्तेन लक्ष्मणेन पृष्टः कृतप्रश्नः रामः पुरातनीः पूर्वराजर्षिसंबन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः कथाः प्राह कथयामास। तन्मध्ये प्रमत्तस्य स्वदत्तासंख्यगवां मध्यात् काचिद् गौः पुनरपि स्वीयगोमंडले मिश्रीभूताऽसीत्। तां राजा नृगः प्रमादात् अन्यस्मै ब्राह्मणाय पुनरपि ददौ, अतः उक्तं प्रमत्तस्येति अनवधानतयेत्यर्थः । एतादृशस्य राज्ञो नृगस्य ब्राह्मणशापात् तिर्यक्त्वं कृकलासत्वं प्रकृते, तथैवोक्तत्वात् प्राप्तं राघवः आह तेनाज्ञानतोऽपि ब्राह्मणस्वहरणं दोषावहमिति गम्यते किमु वक्तव्यं ज्ञानतः तद्धरणं दूषणास्पदमिति प्राञ्चः। वयमत्र ब्रूमः—धर्माधर्मव्याख्यानप्रसंगेन धर्मद्वैविध्यं कथयितुं प्रथमं प्रवृत्तिधर्मस्य परिणामवैरस्यं वैराग्याय दर्शयति नृगवृत्तान्तेन। द्विविधो हि वेदोक्तो धर्मः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च। प्रवृत्तिलक्षणधर्मस्तु देवादिस्थानप्राप्तिहेतुत्वात् सर्वजीवनिकायस्य बंधकः ऐहिकामुष्मिकसुखावाप्तये साधनत्वेन सकामापरपर्यायस्य प्रवृत्तधर्मस्यैवोक्तत्वात्; तथैवोक्तं मनुना—

सोऽयं धर्मो द्विधा प्रोक्तः संमतो वेदशास्त्रतः।
प्रवृत्तश्च निवृत्तश्चेत्येवं भेदविवक्षया ॥
इहामुत्रार्थदं काम्यं प्रवृत्तं कर्म कीर्त्यते।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ॥

नहि तदाचरणेन जन्ममरणसंसृतिर्विरमति; अन्यच्च प्रायः यथा विध्यननुष्ठानेन न्यूनाधिक्यवैपरीत्यकरणरूपदोषेण युक्तत्वात् प्रवृत्तकर्मणः फलवैपरीत्यं नियतं इत्यनेन नृगवृत्तेन दर्शयति भगवान् रामो दाशरथिः। राज्ञा नृगेनोत्तमलोकलिप्सया कृते गोदाने अनवधानतया दत्तदानतोऽनर्थ एव कृकलासजन्मलाभः

तस्य संजज्ञे । अतः सकामं कर्म नाचरणीयं बंधकत्वात् । उक्तं च येषां ऐहिकामुष्मिकभोगप्रेप्सा भवेत् तैश्च सर्वांगोपांगाव्यतिरिक्तं काम्यमनुष्ठेयं भवेत् यथेच्छं नश्वरो भोगलाभः इति अन्यत् प्रत्युत निष्कामकर्मणो न क्वापि हानिः ।

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥

इति स्मृतेश्च । अयं भावः—प्रकृतश्लोके काम्यकर्मणः बंधकत्वं उभयतोऽपि सिद्धं इत्यभिप्रायेण भगवता उक्तो नृगवृत्तान्त इत्यलम् ॥ २ ॥

विजनस्थं रामं लक्ष्मणो भक्त्या ब्रवीति—

**कदाचिदेकान्तमुपस्थितं प्रभुं**
**रामं रमालालितपादपङ्कजम् ॥**
**सौमित्रिरासादितशुद्धभावनः**
**प्रणम्य भक्त्या विनयान्वितोऽब्रवीत् ॥ ३ ॥**

कदाचिदिति । कदाचित् कस्मिंश्चित् समये एकांते रहसि विजने इत्यर्थः । उपस्थितं प्राप्तं प्रभुं प्रभवति प्रजाशासने लौकिकोऽयमर्थः । वस्तुतस्तु प्रभवति ब्रह्मरुद्रादिशासने पंचमहाभूतादिरप्यस्य शासने वरीवर्ति "अस्यैव प्रशासने गार्गीसूर्याचंद्रमसौ विधृतौ तिष्ठतः" इति बृहदारण्यकश्रुतेः । देवानामपि शासने अयं प्रभुः किमु वक्तव्यं पृथिव्यादिशासन इति भावः । रमालालितपादपंकजं रमया मायाशक्त्या मूर्तिमत्या सीतादेव्या, लालिते संवाहिते पादपंकजे पदकमले यस्य । अत्र लालितेति भूते निष्ठा । साप्रतं सीतानिर्वासनस्य प्रसिद्धत्वात् तं रामं सौमित्रिर्लक्ष्मणोऽब्रवीत् इत्युत्तरार्धेनान्वयः । प्रणम्य प्रणतिस्तु गुरुशरणागतौ प्रथममावश्यकी । साष्टांगं नमस्कृत्येत्यर्थः । "तद्विद्धि प्रणिपातेन" इति स्मृतेश्च । अनेन गुरूपसदनप्रकार उक्तः । "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुतेः । ननु कथं प्रथममेव गुरूपसदनं दर्शितं साधकस्याशुद्धचित्तत्वात् इति चेत् । मैवं । आदौ भगवदुक्तपूर्वराजसंबंधिनीधर्माधर्मनिर्णेत्रीकथाश्रवणेन भगवत्परिचर्यया च श्रीरामसेवयेत्यर्थः, आसादितशुद्धभावनः आसादितं कृतं शुद्धं भावनं अन्तःकरणं येन शुद्धान्तःकरण इत्यर्थः । भक्त्या श्रीगुरुप्रेम्णा विनयान्वितः शालीनतया अत्यन्तनम्र इति भावः ॥ ३ ॥

आदौ गुरोर्माहात्म्यमीश्वराभिन्नत्वं च प्रतिपादयति—

**त्वं शुद्धबोधोऽसि हि सर्वदेहिना-**
**मात्मास्यधीशोऽसि निराकृतिः स्वयम् ॥**
**प्रतीयसे ज्ञानदृशां महामते**
**पादाब्जभृंगाहितसङ्गसङ्गिनाम् ॥ ४ ॥**

त्वमिति । हे महामते महती सर्वज्ञत्वात् सर्वविषयावगाहिनी अत एव विशाला मतिर्यस्य तत्संबुद्धौ हे महामते हे सर्वज्ञ, त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनां आत्मासि । अत्र देहभेदेऽपि आत्मैक्याभिप्रायेण आत्मेत्येकवचनम् । एतेन प्रतिशरीरं भिन्ना विभवश्चात्मान इति सांख्यपक्षं निराकृत्य शुद्धबोधोऽसि इति अनेन बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाख्यनवविशेषगुणवन्तः प्रतिशरीरं भिन्ना नित्या विभवश्चात्मान इति नैय्यायिकपक्षोऽपि प्रत्युक्तः । तथा च जाग्रदाद्यवस्थाभेदेऽपि न तत्र ज्ञानभेदः । तथाहि तत्तदवस्थागतविषयभेदेऽपि विवादाध्यासितं ज्ञानं (बोधः) स्वाभाविकभेदशून्यम् । उपाधिपरामर्शमंतरेणाविभाव्यमानभेदत्वात् गगनवत् । न तत्तदवस्थागतज्ञानभेदे प्रमाणं दृश्यते यथा न जाग्रदवस्थायां घटपटाद्यवच्छिन्नज्ञाने तत्त्वतो भेदं पश्यामः दृश्यमानेऽपि पदार्थभेदे । किंच स्वप्नपदार्थभेदेऽपि न स्वप्नावस्थायां ज्ञानभेदो वर्तत इति प्रामाणिकं उत च सौषुप्ततमोऽज्ञानं तत्रत्यतमसो भिद्यते । एवं च जाग्रत्स्वप्नसुषुप्तिगतपदार्थानां तथा अवस्थानां भेदेऽपि सर्वावस्थासु ज्ञानं तु एकमेव । अत एवोक्तं भगवता विद्यारण्येन—"शब्दस्पर्शादयो वेद्या वैचित्र्याज्जागरे पृथक् ॥ ततो विभक्ता तत्संविदेकरूप्यान्न भिद्यते ॥ १–३ ॥ तथा स्वप्नेऽत्र वेद्यन्तु न स्थिरं जागरे स्थिरम् ॥ तद्भेदोऽतस्तयोस्संविदेकरूपा न भिद्यते ॥ १ ॥ सुप्तोत्थितस्य सौषुप्ततमो बोधो भवेत् स्मृतिः ॥ सा चावबुद्धविषयावबुद्धं तत्तदा तमः ॥ १ ॥ स बोधो विषयाद्भिन्नो न बोधात्स्वप्नबोधवत् ॥ एवं स्थानत्रयेऽप्येका संवित्तद्वद्दिनांतरे ॥१॥ मासाब्दयुगकल्पेषु गता गम्येष्वनेकधा ॥ नोदेति नास्तमेत्येका संविदेषा स्वयंप्रभा ॥ इयमात्मा परानन्दः परप्रेमास्पदं यतः ॥ मानभूवं हि भूयासमिति प्रेमात्मनीक्ष्यते ॥" इत्यादिना ज्ञानैक्यं तस्य विषयात् भेदः तदेवात्मा इत्युक्तं भवति । एवं शुद्धबोधस्वरूपो निर्विषयज्ञानरूपः सर्व-

देहिनामात्मा त्वमेवासि व्यापकत्वात् चैतन्यस्वरूपात् च "सत्यं ज्ञानमनन्तं ब्रह्म" "अयमात्मा ब्रह्मेति" श्रुतिभ्यां तदेव गम्यते शुद्धबोध एव आत्मा इति भावः । जीवानां तत्प्रतिबिंबत्वात् अधीशोऽसि अंतर्यामित्वात् देहेंद्रियाणां नियामक इत्यर्थः । तथा च सर्वस्य स्थावरजंगमस्य नियंतासि इत्यर्थः । उक्तं च यः पृथिव्यां तिष्ठन् पृथिव्या आन्तरो यमयति यं पृथिवी न वेद इति श्रुत्या । वस्तुतस्तु ब्रह्मैवेदं सर्वमेकं च भेदाभावात् परं च औपाधिकभेदात् नियम्यनियामकत्वं बोध्यम् । निराकृतिः यथा जीवानां स्वार्जितकर्माधीनानेकयोनिषु जन्म, न तथा ईश्वरस्य अविद्यामूलककर्तृत्वकर्मणामेवाभावात् तस्य, अत एव निराकृतिः । तथापि

इच्छया कुरुते देहं इच्छया वितनुर्भवेत् ।
क्रीडते भगवान् लोके बालः क्रीडनकैर्यथा ॥

केवलभक्तानुग्रहार्थं स्वेच्छया भगवतः शरीराविर्भावः न कर्माधीनः इति भावः । निराकृतिः उपाधिराहित्येन अशरीरः पादाब्जभृंगाहितसंगसंगिनां भगवच्चरणकमलयोः भृंगवत् आहितः कृतः संगो यैः तादृशां भगवद्भक्तानां संगोऽस्ति येषां भगवद्भक्तसंगिनां ज्ञानदृशां यद्वा त्वच्चरणकमलयोर्भृंगवत् आहितः कृतः संगो यैः । तादृशान्तःकरणसंगवतां ज्ञानदृशां ज्ञानं सम्यक् ज्ञानं दृक् येषां ते । ज्ञानदृशां सर्वोपाधिशून्यतया सच्चिदानंदरूपेण प्रतीयसे, अपरोक्षतया ज्ञायसे इति भावः ॥ ४ ॥

लक्ष्मणो गुरुत्वेन संमानितं रामं प्रार्थयते—

**अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो**
**भवापवर्गं तव योगिभावितम् ॥**
**यथाञ्जसाऽज्ञानमपारवारिधिं**
**सुखं तरिष्यामि तथानुशाधि माम् ॥ ५ ॥**

अहमिति । भवापवर्गं भवस्य जन्ममरणसंसृतेः अपवर्गो निवृत्तिः यस्मात् एतादृशं भवदीयपदांबुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि । कुतो भवापवर्गं पदाम्बुजं इत्युच्यते चेत्, योगिभावितं यमनियमाद्यष्टांगयोगानुष्ठायिभिः सविकल्पसमाधौ सततं चेतसा विषयीकृतं तथा । अनेन भवापवर्गत्वे तस्य सदाचारः प्रमाणं अथोत्तरार्धेन प्रार्थनीयमाह । अपारवारिधिं न विद्यते पारः परतीरं यस्य

एतादृशं वारिधिं सागरं पूर्वापरतीरवर्जितं समुद्ररूपं अज्ञानं संसारकारणं यथा सुखं अनायासेन तरिष्यामि तथा मां अनुशाधि शिक्षय अपारवारिधिमित्यनेन सपार-समुद्राद्व्यतिरेक उक्तः, अशक्यतरणता तु अनेन ध्वनिता ॥ ५ ॥

अथोत्तरमवतारयति—

**श्रुत्वाऽथ सौमित्रिवचोऽखिलं तदा**
**प्राह प्रपन्नार्तिहरः प्रसन्नधीः ॥**
**विज्ञानमज्ञानतमोपशान्तये**
**श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥**

श्रुत्वेति । रामः अखिलं भक्तिप्रश्रयश्रद्धादिविविधगुणान्वितं, सौमित्रिवचः श्रुत्वा अथ प्रपन्नार्तिहरः प्रपन्नानां स्वशरणानां भक्तानां आर्तिं आधिभौतिकाधिदैविकाध्यात्मिकदुःखं हरतीति भक्तदुःखनाशक इति भूतेभ्यः संजायते तत् आधिभौतिकं–देवेभ्यः संभवति तत् अतिवृष्ट्यादि आधिदैविकं शरीरमधिश्रित्य जायते यत् ज्वरादिदुःखं मनस्तापादि च तत् आध्यात्मिकमिति भावः । प्रसन्नधीः प्रसन्ना कामक्रोधादिविकाररहिता यद्वा निखिलवासनाऽभाववती भ्रमादिहीना वा धीः बुद्धिर्यस्य । दयालुत्वात् भक्तानुग्रहपरा धीरिति प्राचां व्याख्यानं सुरसमेव । क्षितिपालानां राज्ञां भूषणभूतः अज्ञानरूपतमसः अंधकारस्य उपशांतये निरासाय । संधिरार्षः । श्रुतिप्रपन्नं श्रुतिभिः "तमेव विदित्वाऽतिमृत्युमेति, ज्ञात्वा देवं सर्वपाशापहानिः" "ज्ञानादेव तु कैवल्यम्" "तस्मिन् दृष्टे परावरे" इत्यादिभिः प्रपन्नं प्रतिपादितं फलत्वेन बोधितं विज्ञानं आत्मतत्त्वज्ञानं प्राह ॥ ६ ॥

लक्ष्मणं निमित्तीकृत्य संसारिणं जीवं उपदिदिक्षू रामः पूर्वश्लोकोक्तं विज्ञानं च प्रथमं तावत् तत्साधनमाह—

**आदौ स्ववर्णाश्रमवर्णिताः क्रियाः**
**कृत्वा समासादितशुद्धमानसः ॥**
**समाप्य तत्पूर्वमुपात्तसाधनः**
**समाश्रयेत् सद्गुरुमात्मलब्धये ॥ ७ ॥**

आदौ चित्तशुद्धेः प्राक् स्ववर्णाश्रमवर्णिताः स्वस्य कर्तुः वर्णान् ब्राह्मणादीन्

च आश्रमान् ब्रह्मचर्यगृहस्थवानप्रस्थान् उद्दिश्य शास्त्रेण वर्णिताः कथिताः क्रियाः कर्माणि शास्त्रविहितानि चित्तशुद्ध्यर्थं ईश्वरार्पणबुध्या निष्कामतया कृत्वा विधाय तेनैव समासादितं शुद्धं मानसं मनो येन समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिरित्यर्थः । तदुक्तं भागवते—"मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः । नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया" ॥ १ ॥ मनुरपि तथैवाह—"श्रौतं चापि तथा स्मार्तं कर्मालंब्य वसेद् द्विजः ॥ तद्विहीनः पतत्येव ह्यालम्बरहितोऽन्धवत् ॥" इति च । नित्यनैमित्तिकानि यज्ञदानतपोरूपाणि अवश्यं करणीयानि तेषां अकरणे प्रत्यवायश्रवणात् । "वीरहा एष देवानां योऽग्निमुद्वासयते"—इत्यादि श्रुतेः । तथा 'आचाराद्विच्युतो विप्रो न वेदफलमश्नुते इति स्मृतेश्च' अतः कर्मणैव चित्तसंस्करणं भवति इति शास्त्रसिद्धांतः । तदुक्तं वार्तिके, भगवता सुरेश्वराचार्येण "शमाद्युत्पत्तये नान्यत् बुद्धिशुद्धेरपेक्ष्यते ॥ बुद्धिशुद्धौ तु नित्यादिकर्मभ्यो नान्यदिष्यते ॥१॥" "वर्णाश्रमादिधर्मेण प्रेरितोऽकरणे भयं ॥ पश्यन्करोति यत्कर्म तत्संस्कारकमुच्यते ॥२॥" "तमेतं वेदानुवचनेन ब्राह्मणाविविदिषंति यज्ञेन दानेन तपसाऽनाशकेन" इति बृहदारण्यकश्रुतेश्च । तत्पूर्वं तदनुष्ठानपूर्वकं उपात्तसाधनः संगृहीतानि शमादिसाधनानि येन । अयं भावः—कर्मानुष्ठानानंतरं नित्यानित्यवस्तुविवेक इहामुत्रार्थफलभोगविरागः शमादिषट्कसंपत्तिः मुमुक्षुत्वं चेत्यादिसाधनचतुष्टयसंपन्न इत्यर्थः । अनेन हि कर्मणां बहिरंगत्वं शमादीनां चांतरंगत्वं स्फुटमुक्तं भवति । तथैवोक्तं भगवता गीतायां—"आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते ॥" एवं च शमदमवैराग्यादिदार्ढ्यपर्यंतं कर्मानुष्ठानं कर्तव्यमिति सूचितम् । ततः कर्माणि विधितः समाप्य संन्यस्य, त्यक्त्वेत्यर्थः । आत्मलब्धये आत्मज्ञानार्थं श्रवणमननादिद्वारा तत्त्वमस्यादिमहावाक्यविचारपूर्वकसम्यक्ज्ञानार्थमिति भावः । सद्गुरुं श्रोत्रियं ब्रह्मनिष्ठं शाब्दे परे च निष्णातं शास्त्रानुभवसंपन्नं समाश्रयेत् सेवेत । अनेन केवलव्युत्पत्तिबलेन क्रियमाणो विचारो न फलायेति सूचितम् ॥ ७ ॥

अज्ञाननिवृत्तेः कर्तृत्वकर्मादिनिखिलसंसारनिवृत्तिः स्यात् तदर्थं गुरूपसत्तिरेवावश्यकी अन्यथा संसारचक्रोपरमो न स्यात् अतः आदौ संसारभ्रमिमेवाह—

**क्रिया शरीरोद्भवहेतुरादृता प्रियाप्रियौ तौ भवतः सुरागिणः ॥**
**धर्मेतरौ तत्र पुनः शरीरकं पुनः क्रिया चक्रवदीर्यते भवः ॥८॥**

क्रियेति। भवः संसारः चक्रवत् जलोद्धरणघटीयंत्रवत् ईर्यते कथ्यते तदेव प्रतिपादयति। क्रिया शुभाशुभं कर्म कथंभूता क्रिया आदृता आदरपूर्वं पूर्वजन्मार्जिता क्रियेति शेषः। च शरीरोद्भवहेतुः शरीरस्य उद्भवः जन्म तस्मिन् हेतुः; आदिकारणं, पूर्वस्मिन्भवे स्वार्जितं कर्म सांप्रतिकशरीरोद्भवे हेतुरिति तात्पर्यम्। नहि कारणं विना कदाचिदपि कार्योत्पत्तिर्भवति इति भावः। तत्र अस्मिन् जन्मनि सुरागिणः विषयाभिलाषवतः सकामस्येत्यर्थः। कर्तुः तौ प्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौ सुखदुःखजनकौ भवतः, कस्यचित् अधर्मे सुखत्वबुद्ध्या प्रवृत्तिः कस्यचित् धर्मे एवं कदाचिदप्यूह्यम्। तत्रोत्पादितकर्मणा पुनः शरीरकं शरीरप्राप्तिः, प्राप्ते च शरीरे पुनः क्रिया कर्म करोति जीवः इत्येवं चक्रवत् विपरिवृत्तिः सततं प्रचलति, एवं जन्मकर्मणोर्जन्यजनकभावेन विपरिवृत्तिरिति बोध्यम्। तदुक्तं भगवद्गीतायां—"ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति॥" एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते॥ इति॥ ८॥

संसारभ्रमेरज्ञानकारणत्वात् तदज्ञानहानमेव प्रतिपादयति अज्ञानमेवेत्यादिना—

**अज्ञानमेवास्य हि मूलकारणं**
**तद्धानमेवात्र विधौ विधीयते॥**
**विद्यैव तन्नाशविधौ पटीयसी**
**न कर्म तज्जं सविरोधमीरितम्॥ ९॥**

अस्य संसारचक्रस्य पुनः पुनः जन्मकर्ममरणपरंपरारूपस्य मूलकारणमज्ञानमेव, सच्चिदानंदस्य परमात्मनः ज्ञानाभाव एव संसारभ्रमेर्मूलकारणमित्यर्थः, अज्ञानात् कर्तृत्वमुत्पद्यते ततो धर्माधर्मौ ततोऽपूर्वं तस्मात् स्वर्गनरकौ ततस्तु शुभाशुभं यथानुशयं जन्म ततः पुनरपि कर्मेत्यर्थः। अतः अत्रविधौ संसारनिवृत्तिलक्षणेऽर्थे तद्धानमेव विधीयते तस्य मूलकारणाज्ञानस्य हानं नाशः बाधः कर्तव्यत्वेन कथ्यते। साधनभूताज्ञाननाश एव संसारभ्रमिनिवर्तक इति भावः। ननु कर्मैव तन्नाशकमस्तु, किं ज्ञानेनेत्याशंक्याह—विद्यैव सम्यग् ज्ञानमेव तन्नाशविधौ मूलाज्ञानस्य नाशकरणे पटीयसी समर्था, अपरोक्षज्ञानमेव अनाद्यविद्यानाशने शक्तमिति भावः। न कर्म, अज्ञाननाशे समर्थम्, यतः तज्जं तस्मात् अज्ञानात् जातं कर्म—आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात् कर्मणोऽज्ञानजन्यत्वं बोध्यं,

ननु तज्जन्यस्यापि तन्नाशकत्वं वृश्चिककर्कव्यादौ दृष्टमित्याशंक्याह तज्जन्यत्वं न तन्नाशकत्वे प्रयोजकं किं तु सविरोधत्वमेवेत्याह यत् यस्य सविरोधं विरोधेन सह इति सविरोधं नाम विरोधि तत्तस्य नाशकं ईरितं कथितमित्यर्थः ॥ ९ ॥

अत एव कर्मणा नाज्ञानहानिरित्याह—

**नाज्ञानहानिर्न च रागसंक्षयो**
**भवेत्ततः कर्म सदोषमुद्भवेत् ॥**
**ततः पुनः संसृतिरप्यवारिता**
**तस्माद्बुधो ज्ञानविचारवान् भवेत् ॥ १० ॥**

यतः कर्मणोऽज्ञानस्य विरोधाभावात् अज्ञानकर्मणोः परस्परयोर्जन्यजनकभावः प्रतीयते, नहि इतरेतरविरोधकत्वं । अतो नाज्ञानहानिः अज्ञानस्य नाशः त्यागो वा भवितुमर्हति कर्मणेति शेषः । नापि रागसंक्षयो हेयोपादेयविषयवासनानां संक्षयो नाशो नहि भवति । प्रत्युत कर्मानुष्ठानात् अपूर्वद्वारा क्षयिस्वर्गनरकादिफलं आमुष्मिकं ऐहिकं च भोगादि समुद्भवेत् भुक्तेषु च यथापूर्वेषु भोगेषु सत्सु यथानुशयं लब्धजन्मनि जीवे पुनरपि सदोषं क्षयिफलत्वादिदोषविशिष्टं कर्म समुद्भवेत् इति भावः । अत्र कर्म समुद्भवेदित्युक्तं नहि कर्मणः कर्मसंभूतिः संभवति किंतु कर्मणोऽनुक्षणविनाशिनोऽपूर्वोद्भूतिस्ततः फलं शरीरं ततः पुनः पूर्ववत् कर्मसमुद्भव इत्यभिप्रेत्योक्तं कर्म समुद्भवेदिति अथवा कर्मणः फले वृत्तिः स्वीकार्या, लब्धे च फले तत्र कर्मैव भवेदित्याशयेनोक्तं—कर्म समुद्भवेदिति । नहि अज्ञानमूलककर्तृत्वे सति तत्स्वाभाविकं कर्म विरमति किंतु भवेदेव कर्म, ततः कर्मणः पुनः संसृतिः संसारः जन्ममरणलक्षणः अवारिता अनिवारित एव समागच्छेत् इत्यर्थः । न मुक्तिं प्रति आशा कदापि कर्तव्या । तस्मात् बुधो विवेकी ज्ञानविचारवान् ज्ञायते अनेन सच्चिदानंदं ब्रह्म तज्ज्ञानं वेदान्तवाक्यजन्यसम्यग्ज्ञानं तद्विषयकविचारवान् भवेत् ॥ १० ॥

इदानीं ज्ञानस्यैव मोक्षहेतुत्वं वक्तुं ज्ञानकर्मसमुच्चयवादं दूषणायानुवदति सार्धेन—नन्विति—

**ननु क्रिया वेदमुखेन चोदिता**
**यथैव विद्या पुरुषार्थसाधनम् ॥**

**कर्तव्यता प्राणभृतः प्रचोदिता**
**विद्या सहायत्वमुपैति सा पुनः ॥ ११ ॥**

ननु इति शंकायां, वेदमुखेन श्रुतिस्मृतिपुराणद्वारा "इतिहासपुराणाभ्यां वेदं समुपजृम्भते;" ब्रह्मविदाप्नोति परं; "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय, "ज्ञानादेव तु कैवल्यम्" इत्यादिश्रुतिभिः तथा 'पुरुषार्थोऽतः शब्दादिति बादरायणः' इति च ब्रह्मसूत्रेण विद्यैव अपरोक्षज्ञानमेव पुरुषार्थसाधनं मोक्षसाधनं उक्तं तथैव "यावज्जीवं अग्निहोत्रं जुहुयात्", "कुर्वन्नेवेह कर्माणि जिजीविषेत् शतꣳसमाः"—"विद्यां चाविद्यां च यस्तद्वेदोभयंꣳसह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥" इत्यादिश्रुतिभिः "तथा उभाभ्यामेव पक्षाभ्या यथा खे पक्षिणां गतिः। तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतं" इत्यादि स्मृत्या च ज्ञानसाहाय्यत्वेन क्रिया कर्माप्युक्तम्। प्राणभृतः प्राणिनः साधकस्य आवश्यके कर्मणि कर्तव्यता तृतीयार्थे प्रथमा कर्तव्यतया प्रचोदिता विहिता नित्यनैमित्तिका क्रिया विद्यासाहाय्यत्वमुपैति प्राप्नोति शास्त्रविहितत्वात् तदकरणे प्रत्यवायोत्पत्त्या ज्ञानोत्पत्तिरेव न स्यात् अतो विद्यासाहाय्यत्वमस्तु कर्मण इति भावः ॥ ११ ॥

पूर्वपक्षी पूर्वोक्तमेव पूर्वार्धेन दृढयति—कर्मेति।

**कर्माऽकृतौ दोषमपि श्रुतिर्जगौ**
**तस्मात्सदाकार्यमिदं मुमुक्षुणा ॥**
**ननु स्वतंत्रा ध्रुवकार्यकारिणी**
**विद्या नकिञ्चिन्मनसाप्यपेक्ष्यते ॥ १२ ॥**

कर्मेति ॥ कर्माकृतौ कर्मणामकरणे किं स्यात् इति चेत् कर्मणां शास्त्रीयाणां अकरणे प्रत्यवायोत्पत्त्या ज्ञानप्राप्तिरेव न स्यात् अत उक्तं श्रुत्या "वीरहा एष देवानां योऽग्निमुद्वासयते" इति विहितकर्माकरणे दोष उक्तः, तस्मात् अग्निसाध्यश्रौत-स्मार्तकर्माणि अवश्यं अनुष्ठेयानि इति भावः। तत्र सिद्धान्ती परिहरति, ननु इति निश्चयेन विद्या पराविद्या अपरोक्षज्ञानं स्वतंत्रा विनापि कर्मसाहाय्येन स्वकार्य-संपादनसमर्था इतरसाधनानपेक्षा ध्रुवकार्यकारिणी ध्रुवं स्थिरं मोक्षाख्यं अनश्वरं कार्यं करोतीति तथा मोक्षजनिका विद्या मनसा मानससंकल्पेनापि किंचित्

साहाय्यभूतं वस्तु नापेक्षते किमुत-प्रत्यक्षतः किंचित् बाह्यांतरं वा कर्मादि नापेक्षते इति भावः। यथा तेजः तिमिरनिवर्तनसमर्थं स्वयमेव। तद्वत् "उत्पन्ना हि विद्या फलसिद्धौ न किंचिदपेक्षते उत्पत्तिं प्रति तु अपेक्षते इति, "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इति ब्रह्मसूत्रे भाष्यकारेणाप्युक्तत्वात् तथा फले जननीये साहाय्यांतरसंभावना नेति भावः। अनेन विद्या मोक्षाख्यफलजनने स्वतंत्रा साधननिरपेक्षत्वात् तिमिरनिरासे तेजोवत् इत्यनुमानमपि सूचितं भवति ॥ १२ ॥

समुच्चयवादी पूर्वश्लोकस्योत्तरार्धं दूषयति—

**न सत्यकार्योऽपि हि यद्वदध्वरः**
**प्रकांक्षतेऽन्यानपि कारकादिकान् ॥**
**तथैव विद्या विधितः प्रकाशितै-**
**र्विशिष्यते कर्मभिरेव मुक्तये ॥ १३ ॥**

नेति। यत्त्वयोक्तं स्वतंत्रत्वात् विद्यास्वकार्यसिद्धौ न किंचित्साहाय्यमपेक्षते इति तन्न। कथमित्युच्यते चेत् सत्यकार्यः सत्यं नित्यं कार्यं स्वर्गादि यस्य स इति। ननु कथं अध्वरस्य सत्यकार्यत्वं? श्रुतिप्रामाण्यात्। "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" अत्र श्रुतौ चातुर्मास्ययागकर्तुः अक्षय्यसुकृतत्वोक्तेः स्पष्टत्वात् अविनाशिपुण्यकारणात् प्राप्यस्वर्गादेः कार्यस्यापि अक्षय्यत्वं क्रमागतमेव। यत् कृतकं तदनित्यमित्यनुमानं तु न प्रत्यक्षप्रमाणतो बलवत् मंतव्यं। ननु कथमेतदुच्यते? प्रत्यक्षं श्रुतिः, प्रामाण्यं प्रत्यनपेक्षत्वात्-अनुमानं स्मृतिः प्रामाण्यं प्रति सापेक्षत्वात्। अनेन भाष्येण स्मृतीनामनुमानत्वं उक्तं, श्रुतिस्मृत्योः परस्परविरोधे श्रुतिरेव बलीयसी। अत्र प्रकृतविषये तु न स्मृत्यादि उपन्यस्तं केवलं लौकिकमनुमानमुक्तं भवता तत्कथं बलवत्तरश्रुतिप्रामाण्यं न्यक्कर्तुमर्हति। ननु नात्मज्ञानात् इतरत् किमपि कर्मादि नित्यफलदाने समर्थं भवतीति यत् सिद्धान्तितं वेदान्तिभिः तदसत् आत्मज्ञानं तु क्रत्वंगं सत् कर्मफलायोपयुक्तमेव, नहि देहाद्व्यतिरिक्तः कर्ता भोक्तात्मास्ति इति ज्ञानं विना कर्तुः अदृष्टार्थे कर्मणि प्रवृत्तिः स्यात्, परंच "आम्नायस्य क्रियार्थत्वात् आनर्थक्यमतदर्थानां" ( जैमि. सूत्र-१-२-१ ) इति क्रियापरत्वं शास्त्रस्य दर्शितं अतो वेदान्तानामानर्थक्यमेव अक्रियार्थत्वात् कर्तृदेवताप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वं इत्युक्तं अतो कर्मणैव चातुर्मास्याख्ये-

नाक्षय्यसुकृतलाभेऽक्षय्यस्वर्गफलं इत्यभिप्रेत्योक्तं सत्यकार्योऽपि। इति उक्तं अध्वरो यज्ञादिः कर्मविशेषः अन्यान् अपि एत्रार्थे कारकादिकान् प्रयाजाद्यंगानि आरादुपकारकाणि देशकालादिकानि च प्रकांक्षते स्वसहायत्वेन अपेक्षते तथैव तेनैव प्रकारेण विद्या अपि विधितः विधिस्तु "विधिरत्यंतमप्राप्तौ" इत्यादिना अपूर्वविधिरुच्यते तस्मात् अग्निहोत्रं जुहोति इत्यादि विधिवाक्यतः प्रकाशितैः कथितैः कर्मभिः सहितैव पूर्वोक्ता विद्या सम्यक्ब्रह्मज्ञानं मुक्तये मोक्षाय विशिष्यते विद्या फलदाने कर्मापेक्षा अंगित्वात्। अध्वरे अंगिनि प्रयाजाद्यंगापेक्षदर्शादिवत् इति सत्प्रतिपक्षानुमानमनेन सूचितम्।

पूर्वश्लोकमेवानूद्य सिद्धान्ती दूषयति—केचिदिति।

**केचिद्वदन्तीति वितर्कवादिनः**
**तदप्यसद्दृष्टविरोधकारणात् ॥**
**देहाभिमानादभिवर्धते क्रिया-**
**विद्या गताहंकृतितः प्रसिद्ध्यति ॥ १४ ॥**

केचित् वितर्कवादिनः समुच्चयवादिनः ज्ञानकर्मसमुच्चयेन मोक्षो भवेन्नान्यथा इति समुच्चयस्य मोक्षसाधनत्वं वदन्ति यथा पूर्वं कर्मैव मोक्षसाधनं तज्जन्यस्वर्गाख्यो मोक्षोऽपि—नित्यः इत्युक्तं तन्न, "नास्ति अकृतः कृतेन" इत्यादि श्रुत्या—अकृतः नाम मोक्षः कृतेन नाम कर्मणा न। तस्य कर्मफलस्य स्वर्गस्य भोगभूमिविशेषत्वात्। तथाचोक्तं "तद्यथेह कर्मचितो लोकः क्षीयते एवमेव हि पुण्यचितो लोकः क्षीयते" इति श्रुत्या च यत् कृतकं तदनित्यं यथा घटः इत्यनुमानं तु श्रुत्यनुगृहीतत्वात् नाप्रामाण्यं भजते। श्रुतं अक्षय्यत्वं तु अर्थवादत्वेन विध्यैकवाक्येन सफलं। अथ च परिनिष्ठितवस्तु ज्ञानं तु अनिष्टनिवृत्तिफलकं भवति यथा रज्जुतत्त्वसाक्षात्कारे भ्रांतिजसर्पनिवृत्त्या भयकंपाद्युपरमोऽनुभूयते। अत एव ज्ञानादेव तु कैवल्यम् इति सिद्धान्तितं अद्वैतवादिभिः। तात्पर्यं न कर्मणा मोक्षः इति परास्ताः पूर्वमीमांसकाः, तथैव ज्ञानकर्मसमुच्चयो मोक्षसाधनमित्यपि असत् तत्र हेतुर्दृष्टविरोधकारणात् प्रत्यक्षविरुद्धत्वात् इति भावः। तदेवाह उत्तरार्धेन। क्रिया तु अहंममाभिमानेन वर्धते प्रकर्षेण भवति, नहि देहादिष्वहंभावराहित्येन यत् किंचित् कर्तुं शक्यते। अविद्यावद्विषयाण्येव प्रमाणप्रमेयव्यवहाराः

शास्त्राणि चेति अध्यासभाष्ये उक्तत्वात्, विद्या तु गताहंकृतितः गता अहंकृतिः अहंकारो यस्य तस्मात् एव सार्वविभक्तिकः तसिः प्रसिध्यति सिद्ध्यति इति भावः एवं च अहंकारसत्तामूलकत्वात् कर्मणः ज्ञानकर्मणोः समुच्चयो विरुद्ध इत्यर्थः ॥ १४ ॥

पूर्वपक्ष्युक्तानुमानं दूषयन् विद्यास्वरूपमाह—

विशुद्धविज्ञानविरोचनांचिता
विद्यात्मवृत्तिश्चरमेति भण्यते ॥
उदेति कर्माखिलकारकादिभिः
निहन्ति विद्याखिलकारकादिकान् ॥ १५ ॥

विशुद्धेति । विशुद्धं अखिलद्वैतप्रपंचकारणाऽविद्याविवर्जितं विज्ञानं सच्चिदानंदात्मानुभवरूपं येभ्यस्तानि औपनिषद्वाक्यानि तत्त्वमस्यादीनि तेषां विशेषेण रोचनं रलयोः अभेदात् आलोचनं विचारः "आसुप्तेरामृतेः कालं नयेत् वेदान्तचिंतया" इत्युक्तत्वात् । तेन अञ्चिता प्रापिता या अशेषवैषयिकवृत्तिनिवृत्तिपूर्विका आत्मवृत्तिः ब्रह्माकारांतःकरणवृत्तिः अहंब्रह्मास्मीत्याकारिका इति भावः, सा चरमा इति भण्यते विद्वद्भिरितिशेषः । ननु "यतो वाचो निवर्तंते अप्राप्य मनसा सह" "न तत्र चक्षुर्गच्छति न वाक् गच्छति नो मनः" इत्यादि श्रुतिभिः न तस्य मनोवृत्तिविषयत्वं; भवद्भिस्तु अहंब्रह्मास्मीति चरमावृत्तिर्मन्यते । तर्हि किं तस्यात्मनः वृत्तिव्याप्यत्वमप्यस्ति ? यदि आत्मनः वृत्तिव्याप्तिः स्वीक्रियेत तदा उपरिनिर्दिष्टश्रुतिविरोधः स्यात् नहि कस्यापि नित्यशुद्धबुद्धात्मज्ञानमुत्पद्यते, ब्रह्मणः करणागोचरत्वात्, श्रुतिशास्त्रवैय्यर्थ्यापाताच्च इति । तदसत् । यथा च शास्त्रात् धर्मास्तित्वज्ञानं कर्तुश्च देहांतरसंबधिज्ञानं भवतीति भवद्भिः स्वीकृतम् । तथा तेनैव शास्त्रेण तं त्वौपनिषदं पुरुषं पृच्छामि—न जायते म्रियते वा कदाचित् इत्यादिना आत्मज्ञानं सुशकं, करणागोचरत्वं तु, तस्य फलव्याप्तिनिषेधाभिप्रायम् । शमदमादिसुसंस्कृतं मनः आत्मदर्शने करणं । उपरितनोक्तश्रुतयस्तावत् अशुद्धांतःकरणविषयाः, तथाचोक्तं काठके, "दृश्यते त्वग्र्या बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" "मनसैवेदमाप्तव्यमित्यादि" श्रुतिभिः शास्त्राचार्यशमदमादिसंस्कृतं मनः आत्मदर्शने करणं अत एवोक्तं पंचदश्याम्—"ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता । स्वयं

स्फुरणरूपत्वान्नाभास उपयुज्यते ॥ स्वप्रकाशोऽपि साक्ष्येव धीवृत्त्या व्याप्यतेऽन्यवत् ॥ फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं ॥" तर्हि अहं ब्रह्मास्मीति चरमा आत्मानुभवविषयावृत्तिः समुदेति एव इति भावः—पुनरपि स्थूणानिखननन्यायेन ज्ञानकर्मणोर्वैधर्म्यं समुच्चयनिरासदार्ढ्यायाह । कर्म यज्ञादि अखिलकारकादिभिः सर्वांगोपांगैः सहितं उदेति फलोन्मुखं भवति । विद्या तु अखिलकारकादि निहन्ति तत्र कर्तृत्वबुद्धिं निहन्ति इति भावः अत्र अध्यासभाष्यांतर्गतशास्त्रीयेऽपि व्यवहारे इत्यादि पंक्तयः उदाहार्याः सकलव्यापारकर्तृत्वाभिनिवेशत्यागेन ब्रह्मणि वृत्तिलयो विद्या—अतः सा स्वोत्पत्तौ चित्तशुद्धिद्वारा कर्म सापेक्षा "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इति—ब्रह्मसूत्रात्, च स्वफले जनयितव्ये तन्निरपेक्षैव अन्यथा विद्यास्वरूपस्यैव भंगापत्तेः इति पूर्वपक्ष्युक्तहेतोरसिद्धिः इति प्राञ्चः ॥ १५ ॥

प्रकृतमुपसंहरन् मुमुक्षोर्वर्तनप्रकारमाह—

**तस्मात्त्यजेत् कार्यमशेषतः सुधी-**
**र्विद्याविरोधान्न समुच्चयो भवेत् ॥**
**आत्मानुसंधानपरायणः सदा**
**निवृत्तसर्वेंद्रियवृत्तिगोचरः ॥ १६ ॥**

तस्मादिति । विद्याकर्मणोः तमःप्रकाशवत् विरोधात् विद्याविरोधात् कर्म... सह विद्यायाः विरोधेन समुच्चयो न भवेत् एकेनैव पुरुषेण सह अनुष्ठानं विद्याकर्मणोर्न घटते, तयोरधिकारिभेदात् फलभेदात् निमित्तभेदात् इति भावः । इति सुधीः विचारवान् मुमुक्षुः अशेषतः कर्म त्यजेत् काम्यं निषिद्धं तु त्याज्यमेव परं तु नित्यनैमित्तिकानि यावच्चित्तशुद्धि कर्तव्यानि ततोऽपि ब्रह्मणि चित्तस्थैर्यपर्यंतं कर्तव्यानि एव अनन्तरं कर्मानुसंधानं ज्ञानप्रतिबंधकत्वात् प्रयोजनाभावाच्च न कार्यं, कर्मप्रयोजनं तु चित्तशुद्धिः तस्या जातत्वात् अर्थात् प्रयोजनाभाव एव सिद्धः इति भावः । इदानीं मुमुक्षुकर्तव्यमेवाह निवृत्तसर्वेंद्रियवृत्तिगोचरः इंद्रियाणि तावत् पंचकर्मेंद्रियाणि पंचज्ञानेंद्रियाणि च एकं मनः इत्येकादश—तत्र कर्मेंद्रियाणि तु वाक्पाणिपादपायूपस्थाख्यानि पंचमहाभूतानां पृथक् पृथक् रजोंशैरुत्पन्नानि तथा च ज्ञानेंद्रियाणि श्रोत्रत्वग्नेत्ररसनाघ्राणाख्यानि भूतपंचकस्य पृथक् पृथक् सत्वांशैः समुद्भूतानि सन्ति तानि सर्वाणि स्वभावतः बहिर्विषया-

कृष्टानि यथा निम्नभूप्रदेशे एव स्वभावतो जलं प्रवहति तथैव इंद्रियाणि स्वतः एव विषयोन्मुखानि यतः सांख्यमते तानि राजसानि वेदान्तमतेऽपि कर्मेंद्रियाणां राजसत्वं स्फुटमेवोक्तं ज्ञानेंद्रियाणां भूतपंचकसत्वांशोद्भूतत्वेपि रजोगुणान्वितत्वं नापगच्छति सर्वस्य गुणत्रयकार्यत्वात् कथं ज्ञानेंद्रियाणां रजोगुणराहित्यं संभवेत् ? अतः कारणगुणाः कार्यं व्याप्नुवन्ति इति प्रायो नियमेन यानि रजसो स्वाभाविकानि प्रवृत्त्यादीनि तानि तत्कार्येष्विंद्रियेषु स्वभावत एव दृश्यन्ते । तथा कठश्रुतावपि "पराञ्चि खानि व्यतृणत् स्वयंभूः" इत्युक्तत्वात् इंद्रियाणां विषयोन्मुखत्वं स्वाभाविकमित्यर्थः यद्यपि स्वभावतः इंद्रियाणां विषयप्रवृत्तिर्दुर्वारा तथापि मुमुक्षुः निवृत्ताः इंद्रियाणां गोचराः नाम शब्दादयो विषयाः येन एतादृशो भवेत् विषयेभ्यः इंद्रियाणां परावृत्तिर्मुमुक्षुणा अवश्यं संपादनीयेति भावः । इंद्रियनिग्रहवान् भवेत् इत्यर्थः, तादृशः सन् आत्मानुसंधानपरायणः आत्मनः सच्चिदानंदकूटस्थस्य अनुसंधानं विजातीयप्रत्ययरहितसजातीयप्रत्ययप्रवाहरूपं परं मुख्यं अयनं प्राप्यं यस्य तथाविधो भवेत् अत्र इंद्रियप्रत्याहारः कर्तव्यत्वेनोक्तः तेन तत्पूर्वं प्राणायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

ननु कियत्कालपर्यन्तं कर्माणि कर्तव्यानीत्याकांक्षायां रागिविरागिभेदेन कर्मणां कर्तव्यतामाह रागस्य सत्वासत्वमेव कर्मणः कर्तव्याकर्तव्यत्वे मानं नान्यत् इति एतत् प्रतिपादयति यावदिति ।

**यावत् शरीरादिषु माययाऽत्मधी-**
**स्तावद्विधेयोविधिवादकर्मणां ॥**
**नेतीतिवाक्यैरखिलंनिषिध्य त-**
**ज्ज्ञात्वापरात्मानमथ त्यजेत्क्रियाः ॥ १७ ॥**

यावदिति । मायया अत्रेत्थं बोध्यं उक्तं च ॥ चिदानंदमयब्रह्मप्रतिबिंबसमन्विता । तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा हि सा ॥१॥ सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते । मायाबिंबो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः ॥ २ ॥ अविद्यावशगस्त्वन्यः तद्वैचित्र्यादनेकधा । सा कारणशरीरं स्यात् प्राज्ञस्तत्राभिमानवान् ॥ ३ ॥ इत्यादि पंचदश्यां सच्चिदानंदपरमात्मनः नैसर्गिकी सहजाशक्तिर्हि माया यस्यां बिंबीभूय ईश्वरः विविधं जगत् निर्मिमीते सत्त्वरजस्तमो-

गुणानां साम्यावस्था नाम गुणक्षोभरहिता माया। सैवेह सत्त्वप्राधान्येन ईश्वरोपाधिभूता तथैव सैव माया मलिनसत्त्वप्राधान्येन जीवोपाधिभूता अविद्येति व्यपदिश्यते। अविद्यावशगत्वात् जीवानां तत्पारतंत्र्यं ईश्वरस्य तु न तथा पारवश्यं अपि तु ईश्वराधीनत्वं मायायाः। यद्यपि केवलजीवेश्वरोपाधिभेदमात्रेण वैचित्र्यात् च एकैव माया अविद्यामायाशब्दाभ्यां भिन्नेवाभाति तथापि जीवानां मोहकत्वेन मायैवाविद्या नान्या व्यष्ट्युपाधेः समष्ट्युपाधितः अल्पत्वानल्पत्वकृत भेदान्नान्यः कोऽपि भेदः मायाऽविद्या च स्वयमेव भवति, अत एकैव माया व्यष्ट्युपाधित्वेन अविद्या अज्ञानं इत्यादिशब्दैर्व्यपदिश्यते। अतो मूले उक्तं मायया अविद्यया शरीरादिषु अनात्मसु आत्मधीरात्मबुद्धिः अहंकर्तृत्वादिरूपा बुद्धिः यावत्पर्यंतं वर्तते तावत् विधिवादकर्मणां विधिस्तु तावत् "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति" इत्युक्तत्वात् लिङ्लोट्तव्यप्रत्ययैर्ध्वनितः यजेतेत्यादिरूपः अप्राप्तयागप्रापकः अथच "सायंप्रातरग्निहोत्रं जुहुयात्," "अहरहः संध्यामुपासीत" इत्यादि वाक्यबोधितविधिवादः कर्तव्यतया बोधको येषां तानि कर्माणि तेषां विधेयो वशवर्ती तत्तत्कर्मानुष्ठायी भवेत् इत्यर्थः मायापगमेन कर्तृत्वाद्यध्यासनिरासे तत् अखिलवस्तुजातं "अथात आदेशो नेति नेतीति" वाक्यैर्निषिध्य मिथ्यात्वेन निर्णीय इदं ब्रह्म न, इदं ब्रह्म न इति सकलवस्तुजातस्य अब्रह्मत्वेन अनात्मत्वेन बाधं कृत्वा इत्यर्थः तद्विलक्षणत्वेन सत्यत्वेन परमात्मस्वरूपं ज्ञात्वा सर्वाः क्रियास्त्यजेत् इति प्रागुक्तमेव दार्ढ्याय पुनरुक्तमिति भावः ॥ १७ ॥

आत्मविज्ञाने सति अवश्यं माया निवर्तेत इत्याह—

**यदा परात्मात्मविभेदभेदकं**
**विज्ञानमात्मन्यवभाति भास्वरम् ॥**
**तदैव माया प्रविलीयतेऽञ्जसा**
**सकारकाकारणमात्मसंसृतेः ॥ १८ ॥**

यदेति। परात्मात्मविभेदभेदकं परात्मा परमात्मा आत्मा जीवात्मा अनयोः भेदकं जीवात्मपरमात्मनोर्भेदस्तु अविद्यामायोपाधिभ्यां दृश्यते। परमात्मा तु सच्चिदानंदरूपो नित्यो विभुर्व्यापकश्च "आकाशवत् सर्वगतश्च नित्यः" इति श्रुतेः शुद्धसत्त्वप्रधानमायाप्रतिबिंबितः तां वशीकृत्यास्ते। अतो मायोपाधिकः सर्वज्ञत्वा-

दिविशिष्टः सः । जीवस्तु ( अविद्योपाधिविशिष्टः ) वरीवर्ति तत्तदुपाधिकृतजीवेश्वरयोर्भेदः तस्य भेदकं नाशकं विज्ञानं सम्यक्ज्ञानम् मायाऽविद्योपमर्दनपूर्वकं ब्रह्माकाराखण्डा वृत्तिः भास्वरं प्रकाशकं प्रतिबंधभूतासंभावनाविपरीतभावना-निरासेन यदा अवभाति उदेति तदैव सकारका सकार्या तत्तज्जन्मप्रापकानेकविधकर्मसहिता माया अञ्जसा शीघ्रमेव प्रविलीयते बाधिता भवति । ननु मायानाशो यद्यपि जीवेश्वरोपाधिनिरासपूर्वकं सम्यक्ज्ञानेन भवेत् तथापि कथं संसारोपरमः स्यात् ? अत आह आत्मसंसृतेः कारणं जीवात्मनो जन्ममरणोपादानकारणं माया तन्नाशे नाम मायानाशे तत्कार्यसंसारनाशः स्यादेवेत्यर्थः, कारणनाशे न क्वापि कार्यमवशिष्यते इति भावः ॥ १८ ॥

उक्तमेवार्थं पुनर्द्रढयति—

**श्रुतिप्रमाणाभिविनाशिता च सा**
**कथं भविष्यत्यपि कार्यकारिणी ॥**
**विज्ञानमात्रादमलाद्द्वितीयतः**
**तस्मादविद्या न पुनर्भविष्यति ॥ १९ ॥**

श्रुतीति । श्रुतिप्रमाणाभिविनाशिता श्रुतिप्रमाणानि तावत् "तत्त्वमसि अयमात्मा ब्रह्म प्रज्ञानमानंदं ब्रह्म" इत्यादीनि वेदान्तवाक्यानि तेषां श्रवणमननिदिध्यासनजनिताखंडब्रह्माकारांतःकरणवृत्तिरूपं ज्ञानं अपरोक्षसाक्षात्काररूपं इत्यर्थः, तेन अभिविनाशिता अविद्या अज्ञानं । कार्यकारिणी अनेकविधाविद्याविजृम्भितानि कर्तृत्वकर्मरूपाणि करोतीति तथा कथं भविष्यति । अपि काक्वर्थे इति काकुः, न कथंचिदपि कार्यकारिणी भवेत् इति भावः, स्वरूपत एवासतः कार्यकारित्वाभावात् ( विद्यादृष्ट्या अविद्यातत्कार्याणि मिथ्यैव अतस्तस्याः पुनरुद्भवो न भवतीत्याह ) ननु भवद्भिरुक्तं श्रुतिप्रमाणाभिविनाशिता अविद्या न पुनरुद्भविष्यति इति तत्कथं संगच्छते ? बहवो हि श्रुतवेदान्ताऽपि यथापूर्वकारिणो दृश्यन्ते । उच्यते । अयं भावः—यद्यपि श्रुतिप्रमाणजनितज्ञानेन भवेत् अविद्यानाशः इत्युक्तं तथापि न केवलं सकृत् श्रुतिवाक्यश्रवणेन ज्ञानं लभ्येत इति नियमोऽस्ति । किं तु श्रोत्रियब्रह्मनिष्ठगुरोरुपनिषदां मुहुर्मुहुः श्रवणादिकमपेक्षते यत् "आवृत्तिरसकृदुपदेशात्" इति सूत्रे अनुभवपर्यवसानानि श्रवणादीनि इत्युक्तं यथा ध्यायति

प्रोषितनाथा पतिं इत्यत्र पतिदर्शनपर्यंतं ध्यानं यथा वा तंडुलनिष्पत्तिपर्यंतं शालीनां अवहननक्रिया संपादनीया तथैव श्रवणमनननिदिध्यासानां आवृत्त्यैव परिपाकादनुभवविषयत्वं। श्रवणं तु अशेषवेदान्तानां ब्रह्मात्मन्येव तात्पर्यावधारणं, मननं तु श्रुत्यविरोधिन्या तदुपजीविन्या च युक्त्या विवेचनं मननमुच्यते, विजातीयप्रत्ययानंतरितसजातीयप्रत्ययप्रवाहो निदिध्यासनं इति। अस्य फलं तु—श्रवणेन प्रमाणगतसंदेहनिवृत्तिः फलं भवति, अत एव निवारितप्रमाणसंदेहेन समन्वयाध्यायेन श्रुतेन श्रवणफलं मुमुक्षुः प्राप्नोति अन्ततः। तथाच प्रमेयगतसंदेहनिवृत्तिस्तु मननेन भवति। प्रायः स्मृतिपादतर्कपादादिप्रकरणमननेन जिज्ञासुर्मननफलं लभेत। निदिध्यासेन चित्तैकाग्र्यं असंभावनाविपरीतभावनानाशश्च भवेत् इति वेदान्तवाक्यविचारजनितज्ञानेन नाशिताऽविद्या न कार्यकारिणी स्यात् इति निष्कर्षः—विद्यादृष्ट्या अविद्या तत्कार्याणि मिथ्यैव सत्युपाधौ कालत्रयनिषेधप्रतियोगित्वं मिथ्यात्वं अतस्तस्य न पुनरुद्भवो भविष्यतीत्याह–अमलाद्वितीयतः शुद्धाद्वितीयात्मविषयकात् विज्ञानमात्रात् केवलसम्यक्ज्ञानात् इतरासहकृतत्वात्–स्वातंत्र्येण इति भावः। नष्टा अविद्या तस्मात् न पुनरुद्भविष्यति यथा रज्ज्वज्ञानकृतसर्पभ्रमस्य रज्जुतत्त्वसाक्षात्कारेण निवृत्तौ न पुनः सर्पभ्रांत्युद्भवो भवतीति भावः।

श्रोतृदार्ढ्याय पुनरपि इतरनिरपेक्षाया विद्याया मोक्षकारणत्वं युक्तिपूर्वं कथयति—

यदि स्म नष्टा न पुनः प्रसूयते
कर्ताहमस्मीति मतिः कथं भवेत्? ॥
तस्मात् स्वतन्त्रा न किमप्यपेक्षते
विद्या विमोक्षाय विभाति केवला ॥ २० ॥

यदीति। यदि नष्टा अविद्या आवरणविक्षेपशक्तिमती तथोक्तम्॥ अयं जीवो न कूटस्थं विविनक्ति कदाचन। अनादिरविवेकोऽयं मूलाविद्येति गम्यताम्॥ विक्षेपावृत्तिरूपाभ्यां द्विधाऽविद्या व्यवस्थिता। न भाति नास्ति कूटस्थ इत्यपादानमावृतिः॥ (चित्र. दि. २६) अविद्या तु सच्चिदानंदरूपात्मनोऽज्ञानमेव ततः कूटस्थस्यात्मनोऽभानं भवति कूटस्थो नास्ति न भाति इत्याकारिका मनोवृत्तिः आव-

रणं इत्यभिधीयते अनन्तरं "अविद्यावृतकूटस्थे देहद्वययुता चितिः ॥ शुक्तौ रजतवदध्यस्ता विक्षेपाध्यास उच्यते ॥ ( चि. दी. ३ ) स्थूलोऽहं कृशोऽहं मूकोऽहं बधिरोऽहं इत्यादि आत्मनि स्थूलसूक्ष्मदेहाध्यासो विक्षेप उच्यते इति आवरणविक्षेपवती अविद्या-परोक्षापरोक्षविद्यया नश्यति इत्यर्थः । तत्र तावत् वेदान्तानां श्रवणमननादिभिः परोक्षविद्यया असंभावनादिनिवर्तनेन अविद्यायाः आवरणं नास्ति न भाति कूटस्थ इत्याकारकं नश्यति अस्ति आत्मा देहाऽतिरिक्त इति निश्चीयते अनन्तरं गुरोरनुग्रहेण ईश्वरकृपया च वेदान्तविचारेण तत्त्वमसीतिवाक्यात् कूटस्थोऽहं इति साक्षात् अनुभूय विक्षेपोऽपि विलीयते । एवं च परोक्षापरोक्षविद्यया आवरणविक्षेपवती अविद्या नष्टा भवति । तदुक्तं-"न भाति नास्ति कूटस्थ इति वक्ति प्रसंगतः । कर्ता भोक्ताऽहमस्मीति विक्षेपं प्रतिपद्यते ॥" ( पं. द. ३० ), "अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्तया । पश्चात् कूटस्थ एवास्मीत्येवं वेत्ति विचारतः ॥" ( तृ. पं. ) एवं वेदान्तश्रवणमननिदिध्यासनादिभिः परोक्षापरोक्षविद्यया यदा आवरणविक्षेपवती अविद्या नष्टा भवेत् तदा सा अविद्या न पुनः प्रसूयते उत्पद्यते तदा मूलकारणाऽविद्याभावात् अहमस्य कर्मणः कर्तेति मतिः कथं भवेत्, न कथमपि भवेदित्यर्थः । एवं च कर्तृत्वबुद्ध्यभावात् कर्माभाव एव सिद्धः । ततश्च विद्या स्वफलजनने स्वतंत्रा इतरसाधननिरपेक्षा न किमपि कर्मादि स्वफलोत्पत्तौ ह्यपेक्षते इतरस्याऽसंभवात् अतः केवला निःसाहाय्या विद्यैव मोक्षाय विभाति प्रकाशत इत्यर्थः ॥ २० ॥

अत्रार्थे श्रुतिप्रमाणं दर्शयति—

**सा तैत्तिरीयश्रुतिराह सादरं**
**न्यासं प्रशस्ताखिलकर्मणां स्फुटम् ।**
**एतावदित्याह च वाजिनां श्रुतिः**
**ज्ञानं विमोक्षाय न कर्मसाधनम् ॥ २१ ॥**

सेति । सा सर्वत्रप्रसिद्धा तैत्तिरीयोपनिषद्गता श्रुतिः "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" इत्यादिका श्रुतिः प्रशस्ताखिलकर्मणां प्रशस्तानां अर्थवादवाक्यैः प्राशस्त्येन बोधितानां अखिलकर्मणां सादरं न्यासं संन्यासं स्फुटं स्पष्टं आह स्तुत्यर्थवादैः प्राशस्त्यं बोध्यते यथा "अक्षय्यं ह वै चतुर्मास्ययाजिनः

सुकृतं" भवति च "अपाम सोमममृता अभूमेत्यादि" श्रुतिवाक्यप्रतिपादितपुण्यस्य अक्षय्यत्वेन स्तुतिः। यथा अमृता अभूमेत्यत्रापि आत्यन्तिकामरत्वं चापि स्तुत्यर्थवाद एव एतादृशार्थवादबोधितकर्मणां त्याग एव श्रुत्या अभ्यधायि, यतो हि "कर्मसु चामृतत्वं फलं यावद्धर्माधर्मभावि"–"आभूतसंप्लवं स्थानं अमृतत्वं हि भाष्यते"–"तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत" इत्यादिना नात्यन्तिकफलदत्वं प्रवृत्तकर्मणामिति गम्यते। यद्यपि कर्ममीमांसकैरर्थवादवाक्यगतार्थ एव पारमार्थिकत्वेन स्वीक्रियते तथापि "यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः। वेदवादरताः पार्थ नान्यदस्तीतिवादिनः॥" इत्यादिना भगवता स्वयमेव कर्ममीमांसकानां अर्थवादरतत्वं निंद्यते भगवद्गीतायां॥ एवंविधानां कर्मणां न्यासो "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" तथा "तमेतमात्मानमेव लोकमिच्छन्तो प्रव्रजन्ति किं प्रजया करिष्याम" इत्यादिना—"यदहरेव विरजेत् तदहरेव प्रव्रजेत्," "व्युत्थायाथ भिक्षाचर्यं चरन्ति" इत्यादि श्रुतिभिः उच्यते। एवं च कर्मणां न्यासं श्रुतयो वदन्ति यतो न कर्मसमुच्चयो भवितुमर्हति इति भावः। तथा वाजिनां वाजसनेयिनां "एतावदेव खल्वरे अमृत"मित्यादि श्रुतिरपि तदेवाह अतो ज्ञानं विमोक्षाय भवति साधनं। न कर्मेत्यर्थः॥ २१॥

कर्तृत्वाकर्तृत्वरूपकारणभेदात् कर्मज्ञानयोः स्वरूपतो भेदमुक्त्वा फलप्रयुक्तमपि वैषम्यमाह—

**विद्यासमत्वेन तु दर्शितस्त्वया**
**क्रतुर्न दृष्टान्त उदाहृतः समः॥**
**फलैः पृथक्त्वात् बहुकारकैः क्रतुः**
**संसाध्यते ज्ञानमतो विपर्ययम्॥ २२॥**

विद्येति। हे समुच्चयवादिन्! त्वया क्रतुर्दर्शपूर्णमासचातुर्मास्यपशुबंधसोमादीनां मध्ये यः कोऽपि क्रतुः यज्ञविशेषः यद्यपि हविःसंस्थारूपः कर्मविशेषः यज्ञशब्देन उच्यते, सोमसंस्थारूपः क्रतुरित्यभिधीयते यद्वा स्मार्तो यज्ञः श्रौतस्तु क्रतुः किंवा निर्यूपो यज्ञः सयूपः क्रतुः इत्यादि प्रकारेण उच्यते। तथापि प्रकृतश्लोके क्रतुशब्देन सामान्यतः श्रौतस्मार्तकर्मजातं संगृह्यत इति भावः। विद्यासमत्वेन ज्ञानसदृशत्वेन दर्शितः परन्तु समो दृष्टान्तो नोदाहृतः एतावता क्रतुर्विद्या-

[library stamp]

समः श्रुतिबोधितकर्तव्यताकत्वात् इत्यनुमानं निरस्तम्, दृष्टान्ताभावात् पंचावयवात्मकस्यानुमानस्य विना दृष्टान्तेन सिद्धिर्नास्ति उत्तरार्धं अवतारयति । ननु विद्याकर्मणी समे एकफलत्वात् चक्रदंडादिवत् इत्यनुमानमस्ति यथा चक्रदंडौ एकफलकौ तथैव विद्याकर्मणी एकफले अत एव समे इति चेत् तत्राह फलैः पृथक्त्वात् षष्ठ्यर्थे तृतीया, उभयोर्विद्याकर्मणोः फलानां भेदात् न फलैक्यं, एवंच स्वरूपासिद्धो हेतुः नहि प्रकृते फलैक्यसिद्धिः फलभेदो विशदीकर्तव्यः । विद्याया दृष्टफलं मोक्षः कर्मणः अदृष्टफलं स्वर्गादि ( इति एवंरीत्या ) । ननु समानकारकत्वं हेतुः, यथा विद्याकर्मणी समे समानकारकत्वात् इति तदपि न इत्याह—क्रतुः कर्म बहुकारकैः अहंममताभिमानरूपैरंतरंगैर्बाह्यैश्च देशकालादिनियमैः संसाध्यते साध्यते संपाद्यते इत्यर्थः । ज्ञानं तु अतः कर्मणो विपर्ययं विपरीतं न किंचित्कारकसाध्यं, तस्माज्ज्ञानयोः कारकसाम्यमपि इति भावः ॥ २२ ॥

ननु कर्माकरणे शास्त्रतः प्रत्यवायोक्तेः तद्भियाऽवश्यं कर्म कार्यमिति चेत् नेत्याह—

सप्रत्यवायो ह्यहमित्यनात्मधी-
रज्ञप्रसिद्धा नतु तत्त्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभि-
र्विधानतः कर्म विधिप्रकाशितं ॥ २३ ॥

सप्रत्यवाय इति । अहं कर्मत्यागेन प्रत्यवायेन सह वर्ते इति सप्रत्यवायो भविष्यामि इति एवं प्रकारेण शुद्धसच्चिदानंदस्वरूपे प्रत्यगात्मनि अनात्मधर्मस्य धीः बुद्धिः अज्ञप्रसिद्धा तत्त्वज्ञानविकलस्य प्रसिद्धा न तु तत्त्वदर्शिनः तस्य अविद्यामूलकाहंकर्तृत्वभोक्तृत्वादीनां अभावात् । तत्त्वदर्शी नाहं कर्ता न भोक्ता इति मन्यते पापादीनां अनात्मधर्मता निश्चयात् ॥ तस्माद्बुधैः क्रियात्मभिः षष्ठ्यर्थे तृतीया, क्रियास्वेव आत्मा चित्तं येषां कर्मासक्तचित्तानामित्यर्थः । विधानतः विधानेन कर्तव्यतया उक्तं विधिप्रकाशितं विधिवाक्येन बोधितमपि कर्म त्याज्यम् इत्यर्थः । अत एव उक्तं श्रीमदाचार्यपादैः—"प्रत्यवायस्तु तस्यैव यस्याहंकार इष्यते ॥ अहंकारफलार्थित्वे विद्येते नात्मवेदिनः ॥" इतः परं प्रारब्धकर्मवशाद्यद्यत्कर्म ज्ञानिनो भवेत् तत्र कर्तृत्वभोक्तृत्वादीनामभावेन न तत्कर्म किंतु कर्माभास एवाबंधकत्वात् अत एव भगवतोक्तं गीतायां—"यस्य नाहंकृतो भावो बुद्धिर्यस्य न

लिप्यते। हत्वापि स इमाँल्लोकान्न हंति न निबध्यते ॥१॥" अतो बाधिताविद्यामूलकर्तृत्वादेर्नावकाशः इति भावः। कर्म तु प्रारब्धकर्म प्रवाहपतितं ज्ञानिनोऽपि भवत्येव ज्ञानी न कर्ता न भोक्तेत्यनुभवपूर्णो विचरति इत्यलम् ॥ २३ ॥

विरक्तस्य कार्यमाह—

श्रद्धान्वितस्तत्त्वमसीति वाक्यतो
गुरोः प्रसादादपि शुद्धमानसः॥
विज्ञाय चैकात्म्यमथात्मजीवयोः
सुखी भवेन्मेरुरिवाप्रकंपनः ॥ २४ ॥

श्रद्धेति। निष्कामेश्वरार्पितकर्मणा निर्गतनिखिलवासनात्वेन शुद्धमानसो निर्मलान्तःकरणः तदुक्तं "चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये" इत्यादिना चित्तशुद्ध्यर्थं कर्मणोऽऽवश्यकत्वं तथा च ॥ शोध्यमानं तु तच्चित्तमीश्वरार्पितकर्मभिः। वैराग्यं ब्रह्मलोकादौ व्यनक्त्याशु सुनिर्मलम् ॥ इति केवलं निष्कामेश्वरार्पितकर्मणैव वैराग्यादिलक्षणचित्तशुद्धेर्लभ्यमानत्वात्। प्रथमं कर्माणि अवश्यं विधाय शुद्धमना इत्यर्थः। श्रद्धान्वितः श्रद्धा गुरुवेदान्तवाक्येषु विश्वासः तया अन्वितः युक्तः "शान्तो दांतस्तितिक्षुरुपरतः श्रद्धावित्तो भूत्वे" त्यादि श्रुतिः शमदमादिषट्कसंपन्नत्वं कथयति, अतः श्रद्धान्वितः इत्यनेन शमादिसाधनसंपन्नत्वमपि बोध्यत इति भावः। एतादृशो मुमुक्षुः श्रोत्रियं ब्रह्मनिष्ठं सद्गुरुं शरणं गत्वा प्रणिपातपरिप्रश्नसेवादिभिः गुरुं प्रसाद्य गुरुप्रसादात् श्रुततत्त्वमस्यादिमहावाक्यात् श्रवणमनननिदिध्यासपरिपाकजात् महावाक्योत्थसम्यग्ज्ञानात् आत्मजीवयोः परमात्मजीवात्मनोः उपाधिनिरसनेन ऐकात्म्यं उभयोरेकत्वं विज्ञाय साक्षात्कृत्य अथ अनन्तरं सुखी त्रिविधदुःखसत्यत्वभ्रांतिरहितः उपाधिनिराकरणेन पूर्णानंदपरिप्लुतः मेरुरिव अप्रकंपनश्च भवेत् यथा मेरुर्वर्षावातातपादिविविधोपद्रवेषु प्राप्तेष्वपि न विचलितो भवति। तथा प्रारब्धप्राप्तानेकसुखदुःखनिमित्तेष्वागतेषु निर्विकारो भवेत्—तदुक्तं गीतायां "आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्। तद्वत् कामा यं प्रविशन्ति सर्वे स शांतिमाप्नोति न कामकामी॥" अत्र इत्थं विचार्यते—प्रकृतश्लोके गुरुप्रसादेन तत्त्वमसीति वाक्यतो जीवात्मपरमात्मनोरैकात्म्यं विज्ञायेत्युक्तं। ननु कथं महावाक्यविचारात्

अपरोक्षज्ञानं भवेत् ? न कदापि स्यात् शब्दादपरोक्षज्ञानं । यतः "सम्यक् परोक्षानुभवसाधनं आगमः" इति आगमलक्षणं उक्तं अतो महावाक्यादपरोक्षज्ञानं जायते इति कथं संसिध्येत् । अथ युक्तितो विचारिते प्रकृतविषये तथैव भाति विमतं महावाक्यं परोक्षज्ञानजनकं भवति वाक्यत्वात् । स्वर्गादिप्रतिपादकवाक्यवत् इति अनुमानमपि न वाक्यतः अपरोक्षज्ञानसिद्धिं साधयति । अथ कथमुच्यते महावाक्यादैकात्म्यज्ञानं भवति इति । तदसत्, आक्षेपकैर्यद्यपि सम्यक्परोक्षानुभवसाधनमागमः इति आगमलक्षणमुक्तं तथापि "स्वतोऽपरोक्षजीवस्य ब्रह्मत्वमभिवाञ्छतः । नश्येत् सिद्धापरोक्षत्वमिति युक्तिर्महत्यहो ॥" (पं. तृ. ६१), "यत्साक्षादपरोक्षाद्ब्रह्म" इत्यादि श्रुत्या अपरोक्षजीवात्मनो ब्रह्मत्वमुक्तं तथाच स्वतःसिद्धा जीवस्यापरोक्षता कथं नश्येत् ? । अपि च वाक्यात् परोक्षज्ञानमेव जायते स्वर्गादिप्रतिपादकवाक्यवत् इति अनुमानमपि न संगच्छते दशमस्त्वमसि इत्यादिवाक्ये व्यभिचारात् यत् देशकालादिना व्यवहितं वस्तु तस्य शब्देन परोक्षमेव ज्ञानं भवति—किंतु अव्यवहितवस्तुनः शब्देन अपरोक्षोऽपि बोधो भवति इति नियमः । अस्य वाक्यस्य वाक्यत्वे सति अपरोक्षज्ञानजनकत्वं दृश्यते तर्हि भवदीयानुमानगतो हेतुः अनैकान्तिकः । अतो महावाक्यविचारात् भवति अपरोक्षज्ञानमिति सिद्धं । तथा च उक्तं—अस्तु बोधोऽपरोक्षोऽत्र महावाक्यात्तथाप्यसौ । न दृढः श्रवणादीनामाचार्यैः पुनरीरणात् ॥ इति अलम् ॥२४॥

पदार्थबोधपूर्वकत्वात् वाक्यार्थबोधस्येति महावाक्यार्थबोधाय तत्त्वमसीति पदत्रयार्थं सामान्यतो निर्दिशति—

**आदौ पदार्थावगतिर्हि कारणं**
**वाक्यार्थविज्ञानविधौ विधानतः ॥**
**तत्त्वंपदार्थौ परमात्मजीवकाव-**
**सीति चैकात्म्यमथानयोर्भवेत् ॥ २५ ॥**

आदाविति । विधानतः याथार्थ्येन भ्रमप्रमादराहित्येनेत्यर्थः । वाक्यस्य तत्त्वमस्यादेरर्थविज्ञानं जीवात्मपरमात्माभिन्नत्वज्ञानं तस्य विधौ उत्पत्तौ आदौ प्रथमं पदार्थावगतिः तत् त्वं असि इति पदत्रयाणां पृथक्त्वेन ज्ञानं अर्थज्ञानमित्यर्थः कारणं हि प्रसिद्धं तत्त्वंपदार्थौ परमात्मजीवकौ तत् पदार्थः परोक्षत्वसर्वज्ञत्वादि-

विशिष्टो मायोपाधिकः परमात्मा । त्वं-पदार्थस्तु अपरोक्षत्वकिंचिज्ज्ञत्वादिविशि-ष्टोऽज्ञानोपाधिको जीवः । अथ अनयोस्तत्त्वंपदार्थयोरैकात्म्यं ऐकात्म्यबोधकं असीति पदं भवेत् ॥ २५ ॥

जीवात्मपरमात्मनोः विरुद्धधर्मतामाशंक्य कथं तयोरैक्यमित्याह—

**प्रत्यक्परोक्षादिविरोधमात्मनो-**
**र्विहाय संगृह्य तयोश्चिदात्मताम् ॥**
**संशोधितां लक्षणया च लक्षितां**
**ज्ञात्वा स्वमात्मानमथाद्वयो भवेत् ॥ २६ ॥**

प्रत्यगिति । आत्मनोः प्रत्यक्परोक्षादिविरोधं जीवात्मपरमात्मनोः प्रति अञ्च-तीति प्रत्यक् च अक्षणः परमिति परोक्षं ते आदिनी यस्मिन् आदिशब्देन किंचिज्ज्ञत्वसर्वज्ञत्वे नियम्यनियामकत्वे गृहीतव्ये तं विरोधं भेदं विहाय । अय-मत्राशयः—प्रत्यक् चैतन्यं जीवशब्देन व्यपदिश्यते तदुक्तं—“कूटस्थे कल्पितावुद्धिः तत्र चित्प्रतिबिंबकः ॥ प्राणानां धारणाज्जीवः संसारेण स युज्यते ॥” अर्थात् अज्ञानोपहितं चैतन्यं अहंवृत्त्या ज्ञायमानत्वात् अपरोक्षं अज्ञानोपहितत्वेन किंचि-ज्ज्ञत्व रागद्वेषादिधर्मकं उक्तं । तथा मायोपाधिकं चैतन्यं मायोपहितं ब्रह्मेत्यर्थः । परोक्षत्वसर्वज्ञत्वादिधर्मकं परमात्मशब्देन बोध्यते । उभयोस्तु धर्माः प्रत्यक्परोक्षा-दयः परस्परविरुद्धा दृश्यन्ते तान् विरुद्धधर्मान् विहाय त्यक्त्वा तयोरुभयोर्यु-क्तिभिः संशोधितां विचारितां । ननु कथम् तत्त्वंपदाभ्यां युक्तिविचारिताभ्यामपि विरुद्धधर्मयोस्तयोरैक्यज्ञानं संभवेत् ? उच्यते—लक्षणया लक्षितां यद्यपि शक्त्यभावात् न महावाक्यैरैक्यार्थावगमः स्यात् तथापि लक्षणावृत्त्या वक्ष्य-माणप्रकारेणेत्यर्थः, लक्षितां तयोः चिदात्मतां तत्त्वंपदोपस्थितिविषयामित्यर्थः, संगृह्य ज्ञात्वा स्वं आत्मानं ब्रह्मत्वेन विदित्वा अथ ऐकात्म्यज्ञानानंतरं अखंडानंदै-करसो भवेदित्यर्थः । अद्वयो भवेत् तद्यथा—द्विविधा हि प्राप्तिः अप्राप्तवस्तुप्राप्तिः प्राप्तवस्तुप्राप्तिश्च, तत्र अप्राप्तवस्तुप्रप्तिस्तु प्रसिद्धा, परं च प्राप्तप्राप्तिः तु प्राप्तमपि भ्रमवशात् अप्राप्तमित्यवगतं यथा स्वग्रीवागतं ग्रैवेयकं भ्रांतिनिवृत्त्या प्राप्तमिव भाति तथैव नित्यप्राप्तापरोक्षात्मचैतन्यमपि अनाद्यविद्यया अप्राप्तमिव भासते अज्ञस्य । जीवेश्वरोपाधिनिराकरणेन पुनः प्राप्तमिव भाति अत उक्तं-अद्वयो भवेदिति ॥२६॥

उक्तलक्षणास्वरूपकथनपूर्वकं तासामत्रोपयुक्तत्वायुक्तत्वमाह—

**एकात्मकत्वाज्जहती न संभवे-**
**त्तथाऽजहल्लक्षणता विरोधतः ॥**
**सोऽयं पदार्थाविव भागलक्षणा**
**युज्येत तत्त्वंपदयोरदोषतः ॥ २७ ॥**

एकात्मकत्वादिति । शब्दस्य द्वे वृत्ती निगदिते शक्तिर्लक्षणा च अस्मात्पदादयमर्थो बोद्धव्य इति ईश्वरसंकेतः शक्तिरित्युक्तत्वात् नैय्यायिकमते शक्तिनिरूपितमेव पदे शक्तत्वं। वेदान्तमते शक्तिर्नाम पदानां अर्थेषु मुख्यावृत्तिः सा च तत्तत्पदजन्यपदार्थज्ञानरूपकार्यानुमेया, अत्र महावाक्येन प्रत्यक्परोक्षादिधर्मविशिष्टजीवेश्वरैकात्म्यं बोध्यत इत्युच्यते परं तु विरुद्धधर्मिणोरैक्यं न कदाचिदपि भवितुं शक्यं मुख्यया शब्दवृत्त्या । अतो महावाक्यार्थविषये लक्षणावृत्तिरवश्यमाश्रयणीया इति मत्वोच्यते । लक्षणा तु त्रिविधा वर्तते जहतीलक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति तदुक्तं मुख्यार्थबाधे लक्षणा "मानांतरविरोधे तु मुख्यार्थस्यापरिग्रहे ॥ मुख्यार्थेनाविनाभूते प्रवृत्तिर्लक्षणेष्यते ॥" इति ॥ प्रकृतमहावाक्यविषये नहि जहल्लक्षणया अर्थः संपद्येत । यतः "निखिलमपि वाच्यमर्थं त्यक्त्वा वृत्तिस्तदन्वितेऽन्यार्थे ॥ जहतीति लक्षणा स्यात् गंगायां घोष इतिवदत्र न ग्राह्या ॥" इत्युक्त्या जहल्लक्षणा नाम जहत्स्वार्थलक्षणा यथा "गंगायां घोषः प्रतिवसति" अस्मिन्नुदाहरणे गंगापदार्थस्य गंगाप्रवाहस्य घोषाधारतानुपपत्त्या सर्वथा तदर्थपरित्यागेन गंगासंबन्धितीररूपार्थे लक्षणा स्वीक्रियते अत्र, तीरस्य गंगाप्रवाहेण सह संयोगसंबंधः तेन संयोगसंबंधेन संबद्धे तीरे जहल्लक्षणा इति भावः । सा जहल्लक्षणा प्रकृते महावाक्ये न संभवति एकात्मकत्वात् विशेष्यांशस्यैकत्वात् सर्वथा स्वार्थत्यागाभावात् नहि "तत्त्वमसि" इति महावाक्यस्य सर्वथा स्वार्थः त्यक्तव्यः । त्यक्ते वा सर्वथा महावाक्यार्थे कस्मिन् तत्संबंधिनि लक्षणा कार्या इति वाच्यम् । यद्युच्येत, तत्पदार्थत्यागेन तत्पदस्य त्वंपदार्थोपरिलक्षणा स्वीकार्या प्रत्युत त्वंपदार्थत्यागेन तस्य तत्पदार्थोपरिलक्षणा अंगीकार्या तत्र का हानिः ? । तन्न । कस्मिंश्चित् वाक्यार्थसंबंधिनि अश्रूयमाणपदार्थे लक्षणा संभवति । न श्रूयमाणे-अत्र तु श्रूयमाणे तत्त्वंपदे कथं लक्षणा

संभवेत् ? अतः तत्त्वमसीति महावाक्ये न परस्परपदयोर्लक्षणा संगच्छेत, अत एवात्र न जहल्लक्षणयाऽर्थो संभवति । अथ अजहल्लक्षणा अत्र नोपपद्यते, कथमिति चेत्, उच्यते—न स्वार्थं जहाति किंतु अन्यमपि अधिकमुपयुक्तार्थं स्वीकरोति सा अजहल्लक्षणा, तदुक्तं "वाच्यार्थमत्यजन्त्या यस्या वृत्तेः प्रवृत्तिरन्यार्थे ॥ इयमजहतीति कथिता शोणो धावतिवदत्र नो ग्राह्या ॥" ( आचार्यकृतस्वात्मनिरूपणम् श्लो. ३४ ) इति ॥ अजहल्लक्षणया स्वार्थापरित्यागेन तत्संबन्ध्यन्यार्थप्रवृत्तिः स्वीक्रियते । यथा "काकेभ्यो दधि रक्ष्यतां" इत्यत्र काकपदस्य स्वार्थापरित्यागेन दध्युपघातकेषु मार्जारादिषु अपि लक्षणा स्वीक्रियते, नहि काकेभ्यो दधि रक्ष्यतामित्यत्र काकेतरदध्युपघातकवारणं नाकांक्षितं, अपि तु अपेक्षितमेव दध्युपघातकवारणं अत एव तत्र अभ्युपेयते अजहल्लक्षणा, यथा वा शोणो धावतीत्यत्र केवलशोणगुणस्य धावनासंभवात् तदपरित्यागेन धर्मिणि अश्वेऽपि लक्षणा अवश्यं स्वीकार्या भवति । तात्पर्यन्तु शोणगुणविशिष्टोऽश्वो धावति इति । साप्यत्र न, विरोधतः उभयोर्विरुद्धधर्मित्वात् । अयं भावः—जीवेश्वरयोः केवलविशेषणत्यागेन सर्वथा स्वार्थत्यागाभावात्—विशेषणत्यागे सति विशिष्टात्यागात् । न हि अजहल्लक्षणावत् स्वार्थापरित्यागेन अन्यार्थग्रहणमत्र संभवति—अतो विरोधात् न अजहल्लक्षणा संगच्छते । परिशेषात् जहदजहल्लक्षणा अथवा भागत्यागलक्षणैव अत्रांगीकार्या समापतति । तथोक्तं चाचार्यपादैः—"जहदजहतीति सा स्यात् या वाच्यार्थैकदेशमपहाय । बोधयति चैकदेशं सोऽयं द्विज इतिवदाश्रयेदेनाम् ॥" (स्वात्मनिरूपणम् श्लो. ३५) सैवात्र युज्यते तत्त्वंपदयोः, सोऽयं पदार्थाविव भागत्यागलक्षणा युज्यते, अदोषतः दोषाभावात् पूर्वोक्तदोषाभावात् इत्यर्थः । भागयोस्त्यागो यस्याम् उभयत्रापि एकदेशस्य त्यागः एकदेशस्य अत्यागः यस्यां एतादृशी लक्षणा विशेष्यांशस्यात्यागात् विशेषणांशस्य च त्यागात् । तत्र दृष्टान्तः सोऽयं पदार्थाविव यथा सोऽयं देवदत्त इत्यत्र तद्देशकालविशिष्टस्तत्कालानुभव गोचरस्तत्पदार्थः एतद्देशकालविशिष्टः एतत्कालानुभवगोचर एतत्पदार्थः तयोर्विरुद्धविशेषणत्वादैक्यासंभवेन तदेतद्देशकालादिविशेषणत्यागेन अतीतवर्तमानानुभवविशेषणत्यागेन वा देवदत्तपिंडे लक्षणया ऐक्यं यथा भवति तथैव सर्वज्ञत्वकिंचिज्ज्ञत्वादिविशेषणत्यागेन मायाविद्यारूपोपाधिनिरासेन चैतन्यांशस्य एकत्वात् केवलचैतन्यमात्रे भागत्यागलक्षणया ऐक्यं संभवति । अतोऽत्र महावाक्ये भागत्यागलक्षणा प्रवर्तत

इति भावः । अयं भावः—यद्यप्यत्र विशेषणविशिष्टयोः तत्त्वंपदवाच्यार्थयोरविद्यामायाविशिष्टयोः जीवेश्वरयोरैकात्म्यं न संभवति विरुद्धधर्मत्वात् तथापि लक्ष्यार्थयोरैक्ये न कोऽपि दोषः उभयो धर्मत्यागात् ऐक्यं भवेदेवेत्यर्थः ॥ २७ ॥

त्यागाय जीवोपाधिमाह—

**रसादिपंचीकृतभूतसंभवं**
**भोगालयं दुःखसुखादिकर्मणाम् ।**
**शरीरमाद्यंतवदादिकर्मजं**
**मायामयं स्थूलमुपाधिमात्मनः ॥ २८ ॥**

रसादीति । रसादिपंचीकृतभूतसंभवं रसा पृथ्वी आदिर्येषु–पृथ्व्यादिपंचभूतानि शरीरोद्भवसाधनानि । ननु पंचभूतानि शरीरोपादानं कथं, शरीरं तु पार्थिवमेव दृश्यते । न पंचीकृतभूतसंभवं इत्युक्तं, पंचीकरणं तु भूतानि प्रत्येकं द्विधा विभज्य कृतविभागद्वितीयांशान् पुनरपि चतुर्धा विभज्य स्वस्वद्वितीयांशमध्ये इतरार्धचतुर्थांशं प्रत्येकं संमेलनेन पंचीकरणं भवति । तदुक्तं विद्यारण्यैः "द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ॥ स्वस्वेतरद्वितीयांशैर्मेलनात् पंच पंच ते ॥" वियदादिकं एकैकं द्विधा विभज्य नाम–समभागद्वयोपेतं कृत्वा पुनरपि प्रथमं प्रथमं भागं चतुर्धा कृत्वा भागचतुष्टयोपेतं कृत्वा स्वस्वेतरद्वितीयांशैः स्वस्मात् स्वस्मात् इतरेषां चतुर्णां चतुर्णां भूतानां द्वितीयः स्थूलो भागः तेन तेन सह प्रथमप्रथम भागभागांशानां चतुर्णां चतुर्णां मध्ये एकैकस्य योजनात् ते वियदादयः प्रत्येकं अर्थात् पंचीकृताः भवन्ति इति पंचदश्यां उक्तं पंचीकरणेन पंचीकृतभूतेभ्यः संभवो यस्य तत् यस्य भूतस्यभागाधिक्यं कार्ये स्यात् तद्भूतविकारमिदं कार्यमिति स्थूलदृष्ट्या व्यपदिश्यते । यथा पार्थिवमिदं शरीरमत्र पृथ्वीभूयस्त्वात् पार्थिवमिदमिति भण्यते, तथा वैशेष्यात् तु तद्वादः ( अ. २ पा. ४ सूत्र २२ ) इति । चंद्रमण्डलवर्तिनां जीवानां शरीराणि अबाधिक्यात् अम्मयानि इति शास्त्रप्रामाण्यात् अवगम्यते । दुःखसुखादिकर्मणाम् दुःखसुखादीनि यानि कर्माणि नाम कर्मफलानि तेषां भोगस्य आलयः आश्रयः आद्यंतवत् उत्पत्तिविनाशशीलं आदिकर्मजं प्रागभवीयकर्मजन्यं प्रारब्धकर्मजनितं इत्यर्थः । मायामयं परंपरया मायापरिणामं सत्त्वरजस्तमोगुणानां साम्यावस्था माया तस्या एव विकारो महत्तत्त्वं

ततो अहंकारः ततः पंचतन्मात्रा नाम–सूक्ष्मपंचभूतानि तस्मात् मनः पंचज्ञानेंद्रियाणि पंचकर्मेंद्रियाणि पंचभूतानि पंचविषयाश्च इति सांख्याः पौराणिकाश्च मन्यन्ते । तदुक्तं सांख्यतत्त्वकौमुद्याम्–"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ॥ षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" ॥ १ ॥ इति महत्तत्त्वादि सर्वं प्रकृतिविकारत्वात् पंचभूतस्यापि तद्विकारत्वमुक्तं तस्मात् भूतपंचकात् शरीरं समुद्भूतं अतो निश्चितमेवैतत् शरीरं प्रकृतिविकारं तस्मात् संगच्छतेऽस्य मायामयत्वम् इत्यर्थः। तथा च वेदान्तमतेऽपि ईशप्रेरितमायाया एव जगदुत्पत्तिमाहुः श्रुतयः। अस्तु मायापरिणामभूतपंचकमयं स्थूलं शरीरं च आत्मनः उपाधिभूतमिदं शरीरं वदन्ति इति शेषः ॥ २८ ॥

अधुना जीवस्य सूक्ष्मशरीरोपाधिमाह—

**सूक्ष्मं मनोबुद्धिदशेंद्रियैर्युतं**
**प्राणैरपंचीकृतभूतसंभवम् ॥**
**भोक्तुः सुखादेरनुसाधनं भवेत्**
**शरीरमन्यद्विदुरात्मनो बुधाः ॥ २९ ॥**

सूक्ष्ममिति। बुधः अन्यत् स्थूलशरीरविलक्षणं शरीरं लिंगदेहाख्यमात्मन उपाधिं विदुः । तत्स्वरूपमेवाह अत्रेत्थं प्रक्रिया तमःप्रधानप्रकृतेर्जीवभोगाय जीवानां पुण्यपापफलभोगार्थं ईशेच्छया मलिनसत्त्वप्रधानाऽविद्यासकाशात् पृथ्वीजलतेजोवायुवियदादिभूतानि जज्ञिरे, "तस्माद्वा एतस्मादात्मनः आकाशः संभूत आकाशाद्वायुर्वायोरग्निरग्नेराप अद्भ्यः पृथ्वी" इति श्रुतिः। तथा च "तमःप्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया। वियत् पवनतेजोंऽबुभुवो भूतानि जज्ञिरे ॥" इत्युक्तं (पं. तत्त्व. दी. २८) एवं च तमोगुणप्रधानप्रकृतेः पंचमहाभूतानामुत्पत्तिः संजज्ञे ततश्च अपंचीकृतसूक्ष्मपंचमहाभूतानां सत्त्वांशैः यथाक्रमेण ज्ञानेंद्रियपंचकं संजज्ञे, तानि श्रोत्रत्वगक्षिरसनाघ्राणाख्यानि ज्ञानेंद्रियाणि भूतपंचकस्य पृथक् सत्त्वगुणांशेभ्य जज्ञिरे इति तात्पर्यं। तद्यथा आकाशसत्त्वांशात् श्रोत्रेन्द्रियं वायोः सत्त्वांशात् त्वगिंद्रियं तेजसः सत्त्वांशात् नेत्रेंद्रियं अपां सत्त्वांशात् रसनेंद्रियं पृथ्व्याः सत्त्वांशात् च घ्राणेंद्रियं समभवत् । तथैव पंचमहाभूतानां संमिलितसत्त्वांशैरंतःकरणं, समुद्भूतं तच्च वृत्तिभेदेन द्विविधं—संकल्पविकल्पात्मकं, मनो-

निश्चयात्मिका वृत्तिर्बुद्धिः ॥ "मनोविमर्शरूपं स्यात् बुद्धिः स्यान्निश्चयात्मिका ॥" इत्युक्तत्वात् तथैव पंचभूतानां मध्ये एकैकस्य रजोंशात् एकैकं कर्मेंद्रियं प्रादुर्भूतं यथा आकाशरजोंशात् वागिंद्रियं वायो रजोंशात् पाणिः तेजसो रजोंशात् पादेंद्रियं जलरजोंशात् वाग्विन्द्रियं पृथ्व्या रजोंशात् उपस्थेंद्रियं इति यथाक्रमं बोध्यं इमानि कर्मेंद्रियाणि जज्ञिरे । अथ च पंचमहाभूतानां मिलितरजोंशैः प्राणोत्पत्तिः समजनि । स च प्राणो वृत्तिभेदात् पंचधा प्राणापानसमानव्यानोदानाभिधानाश्च ते प्राणाः पंचप्रकाराश्च सन्ति तथा च करणानां प्रत्येकं अधिष्ठात्र्यो देवताश्चापि शास्त्रैरकथ्यन्त । श्रोत्रत्वक्चक्षुरसनाघ्राणानां दिग्वातार्कप्रचेतोऽश्विनाः, वाक्पाणिपादपायूपस्थानां वह्नींद्रोपेंद्रमित्रप्रजापतयो मनोबुद्ध्योश्चेंद्रबृहस्पती तथा पंचप्राणानां सद्योजातवामदेवाऽघोरतत्पुरुषेशानाः पुराणप्रसिद्धाः । तथा च मनोबुद्धिदशेंद्रियैः प्राणैश्च युतं अपंचीकृतभूतसंभवं भूतानां पंचीकरणात् प्रागेव भूतपंचकसंभूतं इत्यर्थः । अत उक्तं अपंचीकृतभूतसंभवं, अत्र अभूततद्भावे च्विः, कर्मेंद्रियपंचकज्ञानेंद्रियपंचकप्राणपंचकमनोबुद्धियुक्तम् सूक्ष्मशरीरं ज्ञेयं, अपंचीकृतभूतसंभवात् एवादृश्यं भोक्तुः जीवस्येत्यर्थः । ननु भोक्तृत्वं कस्य संभवति कूटस्थात्मनो वा चिदाभासस्य, न तावत् कूटस्थात्मनो भोक्तृत्वं । "असंगो ह्ययं पुरुष" इति श्रुतेः । "अव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यते ।" इत्यादि स्मृत्या च निर्विकारस्यात्मनो न हि भोक्तृत्वं संभवेत् । अत एव चिदाभासस्यैव भोक्तृत्वं समापतति । तदपि निरधिष्ठानस्य तस्यासिद्धेः साधिष्ठानचिदाभासस्यैव भोक्तृत्वं अंगीक्रियते अभियुक्तैर्लोके व्यवहारदशायामत एवोक्तं— "उभयात्मक एवातो लोके भोक्ता निगद्यते ।" "भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ।" इति ब्रह्मसूत्रम् । तथैवाह भोक्तुः जीवस्य सुखदुःखादेर्भोगस्य अनुसाधनं स्थूलशरीरस्यैतदनुगतस्यैव भोगसाधनत्वमिति भावः । एतद्वियोगेनैव मरणव्यवहारः इति बोध्यं । तात्पर्यं तु सप्तदशतत्त्वात्मकलिंगशरीरं आत्मनः सूक्ष्मोपाधिः तस्यैव साधनत्वेन स्थूलं भोगसाधनं भवति—तद्विहीनस्य भोगासंभवादिति भावः ॥२९॥

पूर्वोक्तप्रकारेण जीवोपाधिमुक्त्वा क्रमप्राप्तं ईशोपाधिमपि आह—

अनाद्यनिर्वाच्यमपीह कारणं
मायाप्रधानं तु परं शरीरकम् ॥

२८७७ | संस्कृत | १५२



उपाधिभेदात्तु यतः पृथक् स्थितं
स्वात्मानमात्मन्यवधारयेत् क्रमात् ॥ ३० ॥

अनादीति । न विद्यते आदिः उत्पत्तिर्यस्य तत् अनादि । ननु कथम् अनादित्वं कारणस्य ? अत्रेदं न विस्मरणीयं माया अज्ञानमित्यादि पर्यायशब्द एवेति । यदि मायाया उत्पत्तिः कल्प्यते तर्हि सा प्रपंचात् भवति उत ब्रह्मणः, नाद्यः, तस्य तस्याः कार्यत्वात् ( निखिलप्रपंचस्य कारणं मायैव तत्कथं प्रपञ्चात् मायोत्पत्तिः संभवेत् ), यथा पुत्रात् नहि स्वमातुरुत्पत्तिः संभवति कदाचिदपि तथैव न प्रपंचकारणस्य मायायास्तत एवोत्पादः शक्यः कल्पयितुं प्रत्युत मायाभावे प्रपंचस्य आदिकारणं किमिति च भवत्याकांक्षा, अतो न प्रपंचात् मायोत्पत्तिः । न द्वितीयः, यदि ब्रह्मणो मायोत्पत्तिः स्वीक्रियेत तदा निर्विकारस्य ब्रह्मणो विकारित्वं प्रसज्जेत प्रत्युत जीवेश्वरादि सर्वं जगत् मायाकारणकमेवोक्तं श्रुतिस्मृत्यादिभिः तथोक्तं— "कूटस्थासंगमात्मानं जगत्त्वेन करोति सा । चिदाभासस्वरूपेण जीवेशावपि निर्ममे ॥ कूटस्थमनुपद्रुत्य करोति जगदादिकं । दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः ॥" (पं. चि. दी. २३।२४), "मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ । यथेच्छं पिबतां द्वैतं तत्त्वं त्वद्वैतमेव हि ॥" (पं. चि. ३६) इति वाक्यैः जीवेश्वरादिजगत्कारणं मायैव गम्यते, तथैव च आचार्यैरप्युक्तं—"अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा । कार्यानुमेया सुधियैव माया यया जगत् सर्वमिदं प्रसूयते ॥" अत एवानादिर्माया इति सिद्धं; तथा यदि सकलप्रपंचकारणस्य मायाया आदिः कल्प्येत तदा इदमपरमसमंजसं स्यात्, तद्यथा अकृताभ्यागमकृतविप्रणाशदोषौ दुर्निवारौ भविष्यतः इति चेत् । उच्यते—यतः जीवानां अज्ञानोपहितान्तःकरणानां प्रलये तत्रैव समष्ट्यज्ञानस्वरूपमायायां प्रलीयमानत्वात् पुनरपि सृष्ट्युत्पत्तिकाले तेषां ततो मायाया एवोत्पद्यमानत्वात् संगच्छते विषमसृष्ट्युद्गमः इत्यतो नाकृताभ्यागमकृतविप्रणाशाख्यदोषप्रसंगः अनादित्वात् कारणस्य–"अव्यक्तात् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे । रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥ सर्वभूतानि कौंतेय प्रकृतिं यान्ति मामिकां । कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥" इति गीतायां भगवतैवोक्तं, "आसीदिदं तमोभूतमप्रज्ञातमलक्षणं । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥" धाता यथा पूर्वमकल्पयत्" इत्यादिना सृष्टिकारणभूतमायाया अनादित्वं गम्यते अविद्यारूपव्यष्ट्युपाधीनां तत्त्वतो

मायातोऽपृथक् भूतानां मायायामेवैकीभावात् अनादित्वं सिद्धं—"प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥" इति—दैववशात् साक्षात्कारं गते ब्रह्मणि भवति बाधिता अविद्या कर्तुरेवेति न कापि हानिरविद्याया अनादित्वाभ्युपगमे इति । ननु मायाया अनादित्वे द्वैतापत्तिः प्रसज्येत तथा चाद्वैतसिद्धान्तो व्याकुप्येत इति चेत्, न, एकरूपत्वात् न ब्रह्मणो भिन्नत्वेन द्रष्टुं शक्यं तदज्ञानं मायापरपर्यायं । यतः अनिर्वाच्यं सत्त्वासत्त्वाभ्यां निर्वक्तुमशक्यं । यथाग्निशक्तिर्न वह्नितः स्वरूपेण पृथक् दृश्यते । ननु नहि विद्यते वह्नौ दाहकत्वशक्तिरिति चेत् भण्येत, तदसत् । कृते च वह्निस्पर्शे स्फोटककार्येणानुमीयते वह्निशक्तिः, तथैव प्रकृते नहि मायारूपाज्ञानं परमात्मनि विद्यते इति चेदुच्येत कथं तर्हि सृष्टिरूपकार्यं उत्पद्येत? दृश्यते च दृष्टनष्टस्वरूपं जगत्कार्यं ततोऽनुमीयतेऽज्ञानं यद्यपि निर्वक्तुं न शक्यते तथापि विद्यते एव माया यथा सूर्यमरीचिषु मृगजलं प्रातर्न ज्ञायते तर्हि मध्याह्ने कुतो दृश्यते? । अत अनुमीयते प्रातः सवितृरश्मिषु कारणरूपेण वर्तमानमज्ञेयमपि मध्याह्ने मृगजलरूपकार्यरूपेण भासते तथैव सायाह्ने तत्रैव लीयते । माया [illegible] बुध्यमाना स्वरूपे वर्तत एव कारणरूपेण प्रलये, सृष्टिकाले पुनः जगद्रूपेण कियत्कालपर्यंतम् भासते पुनरपि तत्रैव ब्रह्मणि अद्वितीयत्वेन लीयते अतः अनादि अनिर्वाच्यं कारणं सकलप्रपंचनिदानं ईदृशी माया ब्रह्मणः परं ईश्वरत्वसंपादकत्वात् उत्कृष्टं प्रधानमिति भावः । तथा चोक्तं 'जगतो यदुपादानं मायामादाय ता [illegible] मुच्यते ब्रह्म तद् गिरा ॥ यदा मलिनसत्त्वांतां कामकर्मादिदूषिताम् । आदत्ते तत्परं ब्रह्म त्वं पदेन तद [illegible] त्वजीवत्वव्यवहारस्तु मायाधीन इति भावः । प्रधानं प्रधानसंज्ञकं–स्थूलसूक्ष्मकार्यकारणत्वात् प्रधानमिति वा–शरीरकं, स्वार्थे कः, उपाधिभेदात् उपरिनिर्दिष्ट मायाज्ञानरूपोपाधिभेदात् एकमेव सच्चिदानंदं ब्रह्म यतः पृथक् स्थितं जीव ईश्वर इति भेदबुद्धिविषयं अतो लक्षणया उपाधिपरित्यागेन स्वात्मानमात्मनि श्रवणमनननिदिध्यासनक्रमेण अवधारयेत् निश्चयेन जानीयादित्यर्थः ॥ ३० ॥

तत्त्वमस्यादिमहावाक्यार्थफलं पंचकोशविवेकं आह—

**कोशेष्वयं तेषु तु तत्तदाकृति-**
**र्विभाति संगात्स्फटिकोपलो यथा ॥**

असंगरूपोऽयमजो यतोऽद्वयो
विज्ञायतेऽस्मिन् परितो विचारिते ॥ ३१ ॥

कोशेष्विति। अयं अज्ञानोपहितो जीवात्मा (तेषु) कोशेषु अन्नमयप्राणमयविज्ञानमयेषु अथ च आनन्दमयस्यापि जीवत्ववादिनां तु तेन सह पंचकोशेषु, अन्नमयकोशस्तु इदं परिदृश्यमानं स्थूलं पार्थिवं शरीरं। तथा चोक्तं "पितृभुक्तान्नजाद्वीर्यात् जातोऽन्नेनैव वर्धते" इत्यादिना शरीरस्यैवान्नमयकोशत्वं प्रतिपादितं तैत्तिरीयके। तथैव कर्मेंद्रियैः साकं प्राणपंचकं प्राणमयकोशः सर्वशरीरे बलं प्रयच्छन्नेव वर्तते। ज्ञानेंद्रियैः साकं विमर्शात्मकं मनो मनोमयकोश उक्तः विज्ञानमयस्तु ज्ञानेंद्रियैः साकं निश्चयात्मिका बुद्धिर्विज्ञानमयशब्देनोच्यते तथा चिच्छायोपेतं कारणाज्ञानं तु आनन्दमयकोशत्वेन निगद्यते इति सामान्यतो हि कोशस्वरूपाणि दर्शितानि। एते कोशा आत्मस्वरूपाच्छादकत्वेन कृपाणकोशवत् कोशशब्देन व्यवह्रियते। तेषु कोशेषु अध्यासेन जीवात्मा तत्तदाकृतिस्तस्य तस्याकृतिस्तादात्म्यं यस्य तथा—यथा स्फटिकोपलः जपाकुसुमादिसंबंधात् तत्तद्वर्ण इवाभाति तथैवात्मा तत्तत् तादात्म्याध्यासात्तत्कोश एवेति अभिमन्यन्ते मूढाः। यथा चार्वाको देह एवात्माभिमन्यते यथा वा तदेकदेशिन इंद्रियाण्यात्मा इति वादिनः, केचन प्राणात्मवादिनः अपरे मनोमयस्यात्मत्वं वदन्ति इतरे विज्ञानमयस्यात्मत्वं ब्रुवन्ति, केचन मीमांसकाः आनन्दमयस्यात्मत्वं स्वीकुर्वन्ति परं चास्मिन् तत्त्वमसिमहावाक्ये सम्यक् विचारिते मुहुर्मुहुः श्रवणादिना विचारसरणीं नीते—तद्यथा अन्नमयकोशो नात्मा भवितुमर्हति, आद्यन्तवत्त्वात् घटवत् जन्मनः प्राक् मरणोत्तरं चासत्त्वात् अर्थात्—"आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा" इति व्यवहारदशायां दृश्यमानोऽपि अन्नमयकोशो नश्वरत्वात् नात्मा इति निराकृतो नास्तिकशिरोमणिश्चार्वाकः। तथा ये खलु तदेकदेशिनः इन्द्रियाण्यात्मा इति ब्रुवाणा विवदन्ते तदपि अविचारितरमणीयमेव तेषां वचः। यथा, अहंवृत्त्या संबोध्यमानोऽपि देहः नात्मा, तथा केवलेंद्रियाणां भावाभावाभ्यां जन्ममरणे देहस्य भवतः। इन्द्रियाणामभावे शरीरचलनाभावात्। इति चेत्। न काणोऽहं बधिरोऽहं इत्याद्यनुभवाच्चेंद्रियाण्यात्मेति पक्षोपि न सम्यक् घटते। अत इंद्रियाणि आत्मा इत्यपि तेषां भ्रांतिरेव। इंद्रियाणामभावेऽपि देहस्य व्यवहारदर्शनात्, यथा अंधपंग्वादेरिंद्रियाभावेऽपि जीवमानत्वात् अतो नेन्द्रियमात्मा।

अथ च प्राणोपासकाः प्राणमयकोशमात्मत्वेन स्वीकुर्वन्ति शरीरे बलप्रदत्वात् इन्द्रियप्रेरकत्वाच्च इति तेषां मतं । तदसत्, प्राणानां जडत्वात् विवादाध्यासितः प्राणमयकोशो नात्मा भवितुमर्हति जडत्वात् घटवत् जडत्वादेव इन्द्रियप्रेरकत्वाभावश्च । अन्ये च देहादौ अहंता तदुपकरणे च ममतां यः करोति सः मनोमयकोशः आत्मा इति वदन्ति, तन्न । कामक्रोधादिविकारेण विक्रियमाणश्च मनोमयो नात्मा स्यात् विकारित्वात् देहवत् । तथा चापरे क्षणिकं विज्ञानमात्मा इति वादिनो बौद्धा विज्ञानमयकोश आत्मा इति वदन्ति, सोऽपि विज्ञानमयो नात्मा भवितुमर्हति सुषुप्तौ लीयमानत्वेन विलयाद्यवस्थावत्त्वात् घटादिवत् । आनन्दमयस्य आत्मत्वं वदन्तो मीमांसका अवशिष्टाः, परं तु आनन्दमयकोशस्तु नात्मा भवितुमर्हति, कथम्? तस्य कादाचित्कत्वात् इति इत्थं प्रकारेण उपाधिनिरासपूर्वकं विचारिते महावाक्ये आत्मा असंगरूपः आनन्दमयादिकोशधर्मरहितः "असंगो न हि सज्जते ।" इति श्रुतेः । अजः जन्मरहितश्च अद्वयः स्वगतसजातीयविजातीयभेदशून्यश्च विज्ञायते एवं च तत् तत् पंचकोशेभ्य आत्मनो विवेकस्तथा च कोशेषु तत्तदाऽऽकारताप्रतीतिविरहः विचारफलमिति भावः ॥ ३१ ॥

जाग्रदाद्यवस्था अपि बुद्धिधर्मा एव नात्मधर्मा इत्याह—

**बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते**
**स्वप्नादिभेदेन गुणत्रयात्मनः ॥**
**अन्योऽन्यतोऽस्मिन् व्यभिचारतो मृषा**
**नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥**

बुद्धेरिति । इह आत्मनि कथंभूते नित्ये उत्पत्तिनाशरहिते परे अहंकारमहत्तत्त्वमायादिभ्यः अतीते "महतः परमव्यक्तं अव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परागतिः" इति श्रुतेः, "यो बुद्धेः परतस्तु सः" इति स्मृतेश्च, ब्रह्मणि व्यापके केवले निर्विकारे संगवर्जिते इत्यर्थः । शिवे आनन्दरूपे आत्मनि बुद्धेः निश्चयात्मिकान्तःकरणवृत्तेरित्यर्थः । स्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेनेति भावः, या त्रिधा वृत्तिः दृश्यते यत्तदोर्नित्यसंबंधात् सेत्यध्याहार्यम् इति भावः, गुणत्रयात्मनः गुणत्रयं सत्त्वादि आत्मा स्वरूपं यस्या बुद्धेर्धर्मैः इति शेषः, नात्मनः । एतादृशाऽवस्थात्रयस्याऽस्मिन् उक्तविशेषणवति ब्रह्मणि आत्मनि अव-

स्थितिर्न संभवति कुत इत्युच्यते चेत् अवस्थात्रयस्य मृषात्वात्। तदेव निगद्यते अन्योऽन्यतः परस्परतः व्यभिचारतो मृषा सुषुप्तौ स्वप्नजाग्रदवस्थयोरभावात् स्वप्ने सुषुप्तिजाग्रदवस्थयोरभावात् जाग्रदवस्थायां वा इतरयोरभावात्। अयमेव व्यभिचारः यन्नाम किंचित् वस्तु वा अवस्थादिर्वा त्रिकालाबाधितं न भवति तत् तद्व्यभिचारि इति उच्यते, तदेवासत् ज्ञेयं, भगवत्पूज्यपादैस्तूक्तं गीताभाष्ये—"यद्विषया बुद्धिर्व्यभिचरति तत् असत् इति। यद्विषया बुद्धिर्नव्यभिचरति तत् सत्" एवं च अवस्थानां जाग्रदादीनां स्वरूपतो व्यभिचारात् तद्वती बुद्धिवृत्तिर्मृषा एवं च जागरणाद्यवस्थात्रयमपि मिथ्येति भावः। उक्तावस्थात्रयं मृषा स्वरूपतो व्यभिचारात्, यथा घटः, यन्नैवं तन्नैवं, यथा आत्मा कदाचिदपि स्वरूपतोऽव्यभिचारात् सर्वासु अपि अवस्थासु स एवाहं इति तस्य प्रत्यभिज्ञानात् अतो न मृषा अनुवृत्तव्यावृत्तबुद्धिद्वयदर्शनादनुवृत्ते च व्यावृत्तानां कल्पितत्वात् अकल्पितं सर्वभेदकल्पनाधिष्ठानमकार्यकारणं वस्तु सिध्यतीत्यर्थः॥ ३२॥

अथ त्याज्यत्वाय संसारमूलभूतां वृत्तिमाह—

देहेंद्रियप्राणमनश्चिदात्मनां
संघादजस्रं परिवर्तते धियः॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा
यावद्भवेत्तावदसौ भवोद्भवः॥ ३३॥

देहेति। देहेंद्रियप्राणमनश्चिदात्मनां संघात् इतरेतराध्यासात् तमोमूलतया तमोगुणप्रधानाविद्यामूलत्वेन अज्ञलक्षणा अज्ञानमेव लक्षणं यस्याः, अज्ञत्वबोधिका अज्ञानलक्षणेत्यर्थः। धियो बुद्धेर्वृत्तिरजस्रं ज्ञानप्राप्तेः प्राक् ज्ञानप्राप्तिपर्यंतमिति भावः। परिवर्तते वर्तेत इत्यर्थः। यावत्कालपर्यंतमेतादृशी अविद्यामूला अज्ञानोद्भवा बुद्धिवृत्तिर्जीवगता स्यात् तावत्पर्यंतमसौ भवोद्भवः भवस्य संसारस्योद्भव उत्पत्तिः पुनः पुनर्भवेदेव यावन्नाज्ञाननिवृत्तिस्तावन्न जन्ममरणोपरमः अज्ञान मूलत्वात् संसारस्येति भावः। तदुक्तं गीतायां—"कारणं गुणसंगोऽस्य सदसद्योनि जन्मसु"॥ सत्त्वरजस्तमोगुणेषु तत्परिणाम देहेंद्रियविषयादिषु चासक्तिर्जन्मांतरकारणं यद्यपि रजस्तमसोर्हेयत्वमुक्तं प्राधान्येन, तथापि सत्त्वस्यापि बंधकत्वं प्रत्यपादि—"सुखसंगेन बध्नाति ज्ञानसंगेन चानघ इत्यादिना" वैषयिकसुखज्ञानयोरा-

सक्त्या बंधकत्वं सत्त्वस्याप्यस्तीति निर्विवादं अतो गुणासक्तिस्तद्गुणपरिणामबुद्धीन्द्रियदेहविषयाणां चासक्तिः सर्वथा हेया इति भावः । प्रकृते तमोमूलतयेति पदं हेतुत्वेनोपात्तं परं च तत् सत्त्वरजसोरप्युपलक्षणं ज्ञेयं । सत्त्वं तु यद्यपि आत्मज्ञानसाहाय्यकत्वेनोक्तत्वात् आत्मवृत्त्युत्पादकमेवादेयं, तथापि इतरविषयोन्मुखवृत्त्युत्पादकं हेयमेवेत्यर्थः । अतः किमु वक्तव्यं तमोमूलाज्ञानवृत्तिर्हेयेति भावः ॥३३॥

कृतमहावाक्यविचारस्य कर्तव्यमाह—

**नेतिप्रमाणेन निराकृताखिलो**
**हृदा समास्वादितचिद्घनाऽमृतः ॥**
**त्यजेदशेषं जगदात्तसद्रसं**
**पीत्वा यथांभः प्रजहाति तत्फलम् ॥ ३४ ॥**

नेतिप्रमाणेन । "अथात आदेशो नेति नेति" इति श्रुतिप्रमाणेन निराकृतं मिथ्यात्वेन अपवादितं बाधितं अखिलं जगत् येन सः श्रुत्या सर्वस्य जगतः असत्त्वमुक्तं, जगत् असत् अनित्यत्वात् घटवत् तथैवोक्तं श्रुत्या "अतोऽन्यदार्तं" "वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं"–तथा च "तदनन्यत्वमारंभणशब्दादिभ्यः" इति ब्रह्मसूत्रेण, तात्पर्यन्तु दृष्टनष्टस्वरूपं जगत् असत् अतस्तद्ब्रह्म न त्रिकालबाधितत्वाभावात् कियत्कालपर्यन्तं प्रतिभानात् रज्जुसर्पवत्, अज्ञानबाधपर्यंतत्वात्तस्य, ऊर्ध्वं तु बाधितानुवृत्त्या भासमानेऽपि जगति मिथ्यात्वनिश्चयात् न तस्य सत्यत्वेन भानम् इत्यर्थः । अतो ज्ञानी विज्ञातजगन्मिथ्यात्वेन हृदा मनोवृत्त्या समास्वादितचिद्घनाऽमृतः स्वादितब्रह्मानुभवरस इत्यर्थः । अतो गृहीतः सद्रसो माधुर्यं यस्य तदम्भः नारिकेलामृतफलादिगतं रसं पीत्वा यथा अवशिष्टं फलं प्रजहाति तथैव अधिष्ठानसत्ताज्ञानेन आरोपितं अशेषं जगत् मिथ्यात्वेन निश्चितं त्यजेत् तत्रोदासीनो भवेत् अत्र निखिलजगन्निराकरणेन देहेंद्रियबुद्ध्यादीनामपि जगदंतःपातित्वेन मिथ्यात्वं क्रमागतमेव । तर्हि कथं मिथ्याभूतदेहेंद्रियबुद्ध्यादिसाहाय्येन परमार्थसत्यमात्मज्ञानं भवितुमर्हति ? इति चेत् उच्यते । भवति हि असत्यात् सत्यप्रतीतिर्यथा स्वप्नादिषु स्वाप्निकस्त्रीसंभोगेन सत्या रेतश्च्युतिः प्रातः शुक्रेण वस्त्रोपहतिः प्रतीयते तथैव असद्देहेन्द्रियबुद्ध्यादिसाहाय्येन भवेदेव सत्याऽऽत्मप्रतीतिः, अनुभूयन्ते हि सर्वैः इष्टानिष्टस्वप्नदर्शनेन अनुकूलप्रतिकूलफलानि ॥ ३४ ॥

जगतोऽनित्यत्वेन तत्र वैराग्यार्थं आत्मन एव नित्यत्वमाह—

कदाचिदात्मा न मृतो न जायते
न क्षीयते नापि विवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः
स्वयंप्रभः सर्वगतोऽयमद्वयः ॥ ३५ ॥

कदाचिदिति। आत्मा अतति व्याप्नोति इति आत्मा व्यापकं ब्रह्मेति तात्पर्यं स आत्मा कदाचित् कस्मिंश्चित् कालेऽपि न मृतो भवति। ननु मृतो देवदत्तः जातो विष्णुदत्त इति कथं व्यवह्रियते? उच्यते। मरणं तु न केनापि दृष्टं एतादृशरूपविशिष्टमिति किं तु देहे अपगतजीवभावे सति मृतोऽयमिति व्यपदिश्यते। न तावत् मरणमात्मनस्तस्य नित्यशुद्धबुद्धमुक्तस्वरूपत्वात्। मृतिस्तु विक्रिया सा निर्विकारे आत्मनि न संभवति तथा चोक्तं महाभारते सनत्सुजातीये। नहि। मृत्युर्नामरूपतः समुपलभ्यते-॥ "नैव मृत्युर्व्याघ्र इवात्ति जंतून् नैवास्य रूपमुपलभ्यते हि॥" इत्यादिना "मृत्युर्नाम मृत्युरत्यंतविस्मृति"रिति स्मृतेरज्ञानं प्रत्यगानंदविस्मारकत्वेन महामृत्युशब्दितं बोध्यं। ननु पुराणादिषु यमस्य मृत्युत्वेनोल्लेखो दृश्यते तस्य का गतिः? यथा "अथ सत्यवतः कायात् पाशबद्धं वशंगतं। अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्"॥ इत्यादिवाक्येन स्पष्टमेव तत्र तत्र स्थले यमस्य मृत्युत्वं निर्विवादमेवोक्तं। बाढं, भवदुक्तं यमस्य मृत्युत्वं, तथापि यमस्य प्रत्यक्चेतनत्वेन गृहीतस्य देहस्य विस्मारकत्वेन द्वयमपि मृत्युसंज्ञितं मुख्यो मृत्युरज्ञानं गौणो यमः इति। निष्कर्षस्तु परमात्मविस्मारकत्वेनाज्ञानं मुख्यो मृत्युः विद्यमानदेहविस्मारकत्वेन यमो गौणो मृत्युरिति सिद्धं नहि मृत्युर्नामात्मनाशः देहनाशस्तु नापूर्वस्तस्य स्वयमेव नश्वरत्वेन स्वीकृतत्वात्। तस्मात् आत्मा न मृतो भवितुमर्हति। अजत्वात् व्यतिरेके (घटवत्) देहवत् वा। अतो न जायते आत्मा यो हि मृतो भवेत् स एव जायते। ननु तर्हि कथं जातमात्रस्य जातकर्मादिसंस्कारः क्रियते तस्य च शास्त्रीयत्वात्। इति चेत्— तद्यथा जातकर्मादिसंस्कारस्तु देहादीन् निमित्तीकृत्य प्राधान्येन क्रियते। आत्मनस्तु गौणः संस्कारविधिः, यतो नात्मा संस्कार्यः तथैव—"चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तः तद्भावभावित्वात्" इति सूत्रे सूत्रकारभाष्यकारादिभिः स्पष्ट-

मुक्तत्वाच्च । अतो नात्मनः जनिलक्षणविक्रियेति भावः । न क्षीयते नापि विवर्धते । अनवः यो हि सावयवपदार्थो भवेत् तस्यैव अपक्षयवृद्धिविकारौ दृष्टौ न निरवयवस्यात्मनः अतो न क्षीयते न विवर्धते यतः अनवः यो हि नवशब्देन विशिष्येत तस्य जीर्णत्वमप्यापद्येत अयं न तथा अनवो विपरिणामरहितः अनेन षड्भावविकाररहित आत्मा इति बोध्यम् । जन्ममृतिवृद्धिक्षयविपरिणामविकाराश्च शब्दैरेवात्र निराकृता अस्तित्वं तु आत्मनः नास्तित्वसंभवे भावविकारत्वेन संभवेत्–नायं भूत्वा भविता वा न भूयः इति गीतासु । अत्र तु न तथा आत्मनः सर्वदा सर्वत्र विद्यमानत्वात् अतो जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीति वार्ष्यायण्युक्ता भावविकारा नात्मन इति भावः । निरस्तसर्वातिशयः । अनाधेयातिशयत्वं आत्मनः समन्वयभाष्ये सुस्पष्टं कृतम् आचार्यैः निरस्तः दूरीकृतः सर्वस्य देहेंद्रियादेरतिशयो महत्वं येन सः, स्वात्मलाभात् न किंचित् अधिकं विद्यते, अतो देहेंद्रियादीनां महत्त्वं न गण्यते इति भावः । "यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः" इति स्मृतेः "यल्लाभान्न परो लाभ" इति च, यतः सुखात्मकः आनन्दरूपः स्वयंप्रभः स्वप्रकाशः न तु देहेंद्रियादिवत् परप्रकाश्यः "यस्य भासा सर्वमिदं विभातीति" श्रुतेः । सर्वगतः सर्वव्यापकः अयं अहंवृत्त्योल्लेख्यः प्रत्यगात्मा नित्यं सन्निहित इत्यर्थः । अद्वयः सजातीयविजातीयस्वगतभेदरहितः 'अयमात्मा ब्रह्मे'ति श्रुतेरिति भावः ॥ ३५ ॥

एवं निर्विकारे सच्चिदानंदघने प्रत्यगात्मनि जन्ममरणप्रवाहरूपसंसारभानं कथं भवतीति आशंक्य आह—

**एवंविधे ज्ञानमये सुखात्मके**
**कथं भवो दुःखमयः प्रतीयते ॥**
**अज्ञानतोऽध्यासवशात् प्रकाशते**
**ज्ञाने विलीयेत विरोधतः क्षणात् ॥ ३६ ॥**

एवंविधेति । एवंविधे सच्चिदानंदरूपे व्यापके जन्ममरणादिभावविकाररहिते पूर्वोक्ते सुखात्मके सुखस्वरूपे परमात्मनि दुःखमयो दुःखप्रचुरो प्राचुर्यार्थे मयट् प्रत्ययः, स्वर्गपातादारभ्य गर्भवासबाल्य-तारुण्य-वार्धक्यमरणादिस्वर्गनरकादिभोगपर्यंतं दुःखानां बाहुल्यात् उक्तं दुःखमय इति । तथा चोक्तं—भाष्यकारैः केनभाष्ये

'कष्टा खलु सुरनरतिर्यक्प्रेतादिषु संसारदुःखबहुलेषु प्राणिनिकायेषु जन्मजरामरणरोगादिसंप्राप्तिः अज्ञानात् इति' ॥ 'दुःखं स्वर्गात् प्रपाते बहुविधनरके गर्भवासेति दुःखं । निःस्वातंत्र्याशनाय ग्रहगदरुदितैः शैशवे दुःखमेव ॥' एवं च तारुण्यवार्धक्यमरणादिष्वपि अमर्षलोभोद्वेगदुःखानि तथा वार्धक्ये इन्द्रियवैकल्यादिदुःखानि मरणे बहुविधानि दुःखानि विष्णुपुराणादिषु निगदितानि तथा स्वर्गेऽपि ॥ 'दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः ॥' इति सांख्यकारिकायां स्वर्गोऽपि 'उक्तदुःखेनाक्रांत एवास्ति । तस्मात् तत्रापि दुःखं वर्तते' एतादृशो दुःखप्रचुरो भवः संसारः कथं प्रतीयते भासत इति प्रश्नः । अस्य उत्तरमाह । अज्ञानतः सच्चिदानंदस्वरूपस्यात्मनः अज्ञानात् समुद्भूतो योऽध्यासः अतस्मिन् तद्बुद्धिरूपः जडचेतनयोः परस्परधर्मारोपः प्रतीयते अत एव एवंविधाहंममेत्यध्यासवशात् संसारः प्रतीयते प्रत्युत ज्ञाने अपरोक्षे सद्गुरुकृपया संजाते क्षणात् शीघ्रमेव सकारणो भवो विलीयते अस्तमेति अविद्यासहितकार्यप्रपंचो बाधितः स्यात् ज्ञानाज्ञानयोस्तमः प्रकाशवत् विरोधात् इति भावः ॥ ३६ ॥

अध्यासस्वरूपमाह—

**यदन्यदन्यत्र विभाव्यते भ्रमात्**
**अध्यासमित्याहुरमुं विपश्चितः ॥**
**असर्पभूतेऽहिविभावनं यथा**
**रज्ज्वादिके तद्वदपीश्वरे जगत् ॥ ३७ ॥**

यदन्यदिति । भ्रमात् इतरेतराविवेकेन अन्यत्र अन्यस्मिन् वस्तुनि अन्यत् इतरत् यत् भिन्नवस्तु विभाव्यते ज्ञायते यथा रजताध्यासः शुक्तौ परस्पराज्ञानात् भवति इममेवाध्यासमित्याहुः विपश्चितः पंडिताः यथा असर्पभूते रज्जौ मदांधकारे भ्रमवशात् अहिविभावनं सर्पप्रतीतिः दृश्यते तद्वत् सच्चिदानंदघने ईश्वरे जगद्भानं अध्यास एव अत्रेदमवधेयं असर्पभूते रज्ज्वादौ अयं सर्पः इति भानं अधिष्ठानाश्रिताज्ञानबलेन रज्ज्वंशाभानपूर्वकसर्पत्वभानं भवति तत्र रज्जुगतेदमंशभानपूर्वकविशेषांशरज्जोरभाने तत्र सर्पाभास अध्यासः तथैव आत्मनि देहद्वयाध्यासः इति । आकाशे तलमलिनवत् ॥ ३७ ॥

आत्मनि जगद्भावे कीदृशोऽध्यासो निमित्तमित्याह—

विकल्पमायारहिते चिदात्मके-
ऽहंकार एषः प्रथमः प्रकल्पितः ॥
अध्यास एवात्मनि सर्वकारणे
निरामये ब्रह्मणि केवले परे ॥ ३८ ॥

विकल्पेति । विकल्पमायारहिते विकल्प एव माया वा सकलविकल्पस्य जगद्रूपस्य कारणं माया तया रहिते वा कार्यकारणव्यतिरिक्ते चिदात्मके चैतन्यस्वरूपे सर्वकारणे दृश्यादृश्यजगत्कारणे निरामये अविद्याकार्यजनितदुःखासंसर्गिणि केवले निर्विकारे परे क्षराक्षरातीते तथोक्तं—'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ॥' इति ब्रह्मणि व्यापके आत्मनि प्रथमः आद्यः सृष्ट्यङ्कुरः अहंकारः कल्पितः अविद्ययेति शेषः । अहंकार एव साधिष्ठानचिदाभासदेहेंद्रियाणामविवेकेनैकीकरणात् अध्यासशब्देन व्यपदिश्यते । अयमेवाध्यासं जनयति अत एव चिज्जडग्रंथिशब्देन अहंकार एवोच्यतेऽभिज्ञैः यतः चिज्जडपृथक्कारे ब्रह्मानुभवेन संजाते तत्कालमेव—'भिद्यते हृदयग्रंथिः छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।' इति श्रुतेः हृदयग्रंथित्वेनोक्ताहंकारस्य निवृत्तिं सर्वकर्मक्षयं सकलसंदेहनिवृत्तिं च जगाद्भगवान् वेदपुरुषः । निष्कर्षस्तु जडचेतनरूपोऽहंकारोऽविद्यया समुद्भवति । परमात्मानुभवे च बाधितः सन् निवर्तते इति । ननु अहंकारस्तु ज्ञानिनामपि दृश्यते ? यथा याज्ञवल्क्यव्यासदुर्वासादीनां जनकराघवादीनां चानेककर्माणि इतिहासपुराणादिषु श्रूयन्ते नहि कर्तृत्वं विना कर्माणि भवितुमर्हन्ति तथा सति तेऽपि अहंकारिणः स्युः अनिष्टमेतत् । नहि अध्यस्तदेहभावेन ज्ञानित्वं संभवति ते याज्ञवल्क्यादयो ज्ञानिनः इति प्रसिद्धाः । उच्यते । अहंकारस्तु त्रिविधः एको मुख्यो द्वौ अमुख्यौ इति विभागः । तत्र देहिनामज्ञानामध्यासकारणं मुख्योऽहंकारः येन स्थूलोऽहं कृशोऽहं इत्याद्यध्यासो भवति न तथा ज्ञानिनामहंकारः कल्पयितुं शक्यः स्यात् तेषां तु गौणावहंकारौ संभविष्यतो देहादिभिन्नः कूटस्थोऽहमित्यादिप्रकारेण गौणौ अहंकारौ नाध्यासकारणं किं तु मुख्योऽहंकारोऽज्ञानिनामध्यासकारणं भवति । अत एवोक्तं अहंकार एषः प्रथमः प्रकल्पित इति प्रथमो मुख्यः इति भावः । तथैवोक्तं विद्यारण्यैः अधिष्ठानांशसंयुक्तं भ्रमांशमवलम्बते । यदा तदाऽहं संसारीत्येवं जीवोऽभिमन्यते ॥ १ ॥ अन्योन्याध्यासरूपेण कूटस्थासंगयोर्वपुः । एकीभूय भवेन्मुख्यः

तत्र मूढैः प्रयुज्यते ॥ २ ॥ पृथगाभासकूटस्थावमुख्यौ तत्र तत्त्ववित् । पर्यायेण प्रयुंक्तेऽहं शब्दं लोके च वैदिके ॥ ३ ॥ लौकिकव्यवहारेऽहं गच्छामीत्यादिके बुधः । विविच्यैष चिदाभासः कूटस्थात् तं विवक्षति ॥ ४ ॥ असंगोऽहं चिदात्माहंमिति शास्त्रीयदृष्टितः । अहंशब्दं प्रयुंक्तेऽयं कूटस्थे केवले बुधः ॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते । हत्वापि स इमान् लोकान् न हन्ति न निबध्यते ॥' इत्यादिना कर्तृत्वेऽपि ज्ञानिनां अबंधकत्वमुक्तं तस्य कर्तृत्वाहंकारस्य गौणत्वादिति भावः ॥ ३८ ॥

बुद्धिनिष्ठ एव जीवस्य संसारो नात्मनिष्ठ इत्यत्र अन्वयव्यतिरेकौ दर्शयति—

**इच्छादिरागादिसुखादिधर्मिकाः**
**सदा धियः संसृतिहेतवः परे ॥**
**यस्मात् प्रसुप्तौ तदभावतः परः**
**सुखस्वरूपेण विभाव्यते हि नः ॥ ३९ ॥**

इच्छादीति । परे सर्वसाक्षिणि परमात्मनि संसृतिहेतवः संसृतेः संसारस्य हेतवः निदानानि सदा कालत्रयेऽपि धियो बुद्धिवृत्तयः एव भवन्ति, कीदृश्यः ताः इच्छादिरागादिसुखादिधर्मिकाः, अत्रोच्यते तावत् 'अहंकारचिदात्मानौ एकीकृत्याविवेकतः । इदं मे स्यादिदं मे स्यादितीच्छाः कामशब्दिताः ॥ अनेनाविद्योद्भवाहंकारमूलकानेकेच्छानिष्पत्तिर्निगद्यते । काममूलकस्तु संसारो विद्यत इति प्रसिद्धमेव । तथोक्तं सुरेश्वराचार्यैः 'अकामस्य क्रियाः काश्चित् दृश्यन्ते नेह कस्यचित् । यद्यद्धि कुरुते जन्तुस्तत्तत् कामस्य चेष्टितं ॥' इत्यादि स्मृतेः—अत्रेयं व्यवस्था अनाद्यज्ञानजन्याहंकारेण कर्तृत्वात् इदं मे स्यात् इदं मे भूयात् इत्यादयः इष्टवस्तुविषयकेच्छास्तथानिष्टवस्तुविषयकोपेक्षाश्च विजृम्भंते । तथा प्राप्तेष्टवस्तुविषयकरागः प्रतिकूलवस्तुविषयकद्वेषश्च प्रादुर्भवति तथा च अनुकूलप्रतिकूलविषयजन्यसुखदुःखे उत्पद्येते तानि धर्मा यासां ताः इच्छादिरागादिसुखादिधर्मिकाः । ननु सुखस्यात्मस्वरूपेणोक्तत्वात् कथं बुद्धिधर्मत्वं इति चेत् । उच्यते । 'इच्छाद्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।' इत्यत्र वैषयिकसुखस्य क्षेत्रधर्मत्वेनोक्तत्वात् कथं सुखवृत्तिः संसारकारणमिति न च शंकनीयम् । क्षेत्रधर्मत्वात् सुखस्यापि संसारकारणत्वं निर्विवादं । ननु आत्मा कथं संसृतिकारणं न भवेत् । इति चेत् उच्यते—उत्तरार्धेन

यस्मात् कारणात् प्रसुप्तौ गाढप्रसुप्तौ संप्रसादावस्थायामित्यर्थः । तदभावतः तासां इच्छादीनां बुद्धिवृत्तीनामभावतः, यदा बुद्धिः तमसि कारणाज्ञाने विलीना भवति तदैव संप्रसाद इति भण्यते, संप्रसीदत्यस्मिन् विषयेंद्रियसंयोगजन्यं कालुष्यं स संप्रसादः सुषुप्तिः, तस्यां व्यवहारक्षमबुद्धिवृत्तीनामभावात् तमसि लीनत्वाच्च नः अस्माभिः तृतीयार्थे षष्ठी सुखस्वरूपेण परः आत्मा विभाव्यते अनुभूयते इत्यर्थः । नतु संसारित्वेन अनुभवगोचरो भवति सुप्तोत्थितस्य तु 'सुखमहमस्वाप्सं न किंचिदवेदिषं' इति प्रत्यभिज्ञानात् तदानीं निर्विषयसुखरूपात्मनिश्चयो विद्यते इति तात्पर्यं बुद्धिवृत्तिसत्त्वे संसारस्तदभावे नेति अन्वयव्यतिरेकाभ्यां गम्यते बुद्धिवृत्तिः संसारकारणं आत्मा तु सुखरूपो न संसारकारणं इति बोध्यम् ।

अधुना तत्त्वमसीति महावाक्यार्थनिर्णयाय प्रथमं तत्त्वं पदार्थस्वरूपमाह—

**अनाद्यविद्योद्भवबुद्धिबिंबितो**
**जीवः प्रकाशोऽयमितीर्यते चितः ॥**
**आत्मा धियः साक्षितया पृथक् स्थितो**
**बुद्ध्यापरिच्छिन्नपरः स एव हि ॥ ४० ॥**

अनादीति । अनादि अविद्योद्भवबुद्धिबिंबितः न विद्यते आदिर्यस्याः सा पुरुषस्यानादित्वेन तत् शक्तेरप्यनादित्वं क्रमागतमेव सिद्धं । ननु पुरुषशक्तेर्मायाया अनादित्वे द्वैतापत्तिः प्रसज्जेत ? न । शक्तेः शक्तात् पृथक्त्वेन दर्शयितुमशक्यत्वात् न द्वैतापत्तिः । न च पृथक्दर्शनाभावात् सा नास्त्येवेति वाच्यम् इति चेत् । कार्यानुमेयत्वेन गम्यमानत्वात् तस्याः । अतः सदसतोर्विलक्षणा अनिर्वचनीयाविद्येत्यर्थः । तदाश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवलेति भावः, "आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला ॥ पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः" ॥ १ ॥ ( इत्युक्तं संक्षेपशारीरके ) तथोक्तं गीतासु "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ॥" इति श्रुतिस्मृतिभ्यां अनाद्यविद्येति सुस्पष्टं गम्यते, विस्तरस्तु प्रागेवोक्तः । अनादिश्चासौ अविद्या च तस्याः सकाशात् उद्भवो यस्याः सा बुद्धिस्तस्यां बिंबितः

प्रतिबिंबितश्चितश्चैतन्यरूपस्यात्मनः प्रकाशो आभासः जीवोऽयमितीर्यते कथ्यते त्वंपदवाच्य इत्यर्थः । अत्रेत्थं व्यवस्था—अनाद्यविद्योद्भवबुद्धौ कूटस्थस्यात्मनः प्रतिबिंबो जीव इत्युक्तं । ननु कथं सर्वगतस्यात्मनः प्रतिबिंबं प्रतिफलितुं शक्यं ? प्रतिबिंबं तु बिंबोपाध्योर्मध्ये किंचित् अवकाशो भवेत् तदैव संभवेत् । यदि बिंबभूतात्मोपाधिभूतबुद्ध्योरुभयोर्मध्ये किंचिदन्तरं स्वीक्रियेत, तदा आत्मनो व्यापकत्वहानिः प्रसज्येत ततश्च स्वसिद्धान्तहानिश्च स्यात्, तर्हि कथमुच्यते बुद्धिप्रतिबिंबितो जीव इति । उच्यते । नात्रात्मनो व्यापकत्वस्य हानिः कल्पयितुं शक्या यथा सूर्यातपमध्यवर्तिस्फटिकमण्यादौ स्वच्छद्रव्ये सूर्यरश्मीनां भवत्यंतर्बाह्ये प्रवेशस्तथैव सच्चिदानंदात्मनः बुद्धौ बाह्याभ्यंतरे निरवकाशतया प्रकाशः प्रविशति तदेव प्रतिबिंबशब्देनोच्यते एवं च सर्वव्यापकब्रह्मणि कल्पिताविद्योद्भवबुद्धेः सत्त्वगुणविशिष्टत्वेन स्वाच्छयात् तत्र व्यापकस्यांतर्बाह्ये व्यापकत्वेन प्रवेशो दुर्निवारः, अत एव बुद्ध्यवच्छिन्नं चैतन्यं जीव इति पक्षोऽपि प्रत्युक्तः । कथमिति चेत् । उच्यते । यदि बुद्ध्यवच्छिन्नचैतन्यं जीवो भवेत् तर्हि घटकुड्याद्यवच्छिन्नचैतन्यस्य कुतो न जीवत्वं इति पृच्छयते खलु अस्माभिः । यदि ब्रूयात् भवान् बुद्धेः स्वाच्छयात् बुद्ध्यवच्छिन्नचैतन्यस्यैव जीवत्वं । तदाक्रमागत एवास्मत्पक्षः समापतेत् शिरसि भवतः । यत्र स्वाच्छं तत्र प्रतिबिंबो बलादेव भवेत् इति श्रीचरणैर्विद्यारण्यस्वामिभिरुक्तं पंचदश्यां अतएवोक्तं भगवता बादरायणेन "आभास एव च" अत्रत्यभाष्येऽपि प्रतिबिंबपक्षः प्रत्यपादि श्रीमता भाष्यकारेण । ( "वाचस्पतेरवच्छेद आभासो वार्तिकस्य च । प्रतिबिंबं तु संक्षेप शारीरस्येति कथ्यते ॥" एतद्वचनस्य का गतिः ? ) ननु ( अस्तु बुद्धिप्रतिबिंबितपरमात्मा जीव इति परं पुनरप्यक्षिप्यतेऽस्माभिः अंगीकृतप्रतिबिंबपक्षः । निराकारस्यात्मनः कथं प्रतिबिंबं संभवेत् ? नहि निराकारस्य कुत्रापि प्रतिफलनं दृष्टं । तदसत् । निराकारस्याप्याकाशस्य प्रतिबिंबदर्शनात्, यथा कूपादिजलपरिसरवर्तितीरे तिष्ठन् प्रेक्षकस्तत्रकूपादिजले प्रतिफलितं यत् गांभीर्यं विलोकयति । तदेवाकाशस्य प्रतिबिंबं, नाम, यदि निराकारस्य व्योम्नः प्रतिबिंबं निर्विवादं तर्हि कथं न अभ्युपेयं निराकारस्य आत्मनः अपि प्रतिबिंबं ? दृष्टाचादृष्टसिद्धिः । तस्मात् भवेदेवात्मप्रतिबिंबमिति तात्पर्यम् । तदुक्तं—'कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिंबकः । प्राणानां धारणाजीवः संसारेण स युज्यते ॥' साधिष्ठानबुद्धिप्रतिबिंबितो जीवः तस्यैव संसार इति सिद्धं । ननु तर्हि आत्म-

नोऽपि संसारित्वं विकारित्वं च स्यात् इति चेत् न धियः साक्षितया आत्मा कूटस्थोऽन्तर्यामी पृथक् नित्यशुद्धबुद्धस्वरूपः—नृत्यशालास्थदीपवत् निर्विकार एव स्थितः नहि उपाधिधर्मेण सः संसृज्यते नित्यशुद्धबुद्धमुक्तस्वभावत्वात् "असंगो नहि सज्जते इति श्रुतेश्च बुद्ध्या अपरिच्छिन्न" उपाधिदोषानास्कंदितः परः परमात्मा स एव जीव उपाधिविनिर्मुक्तो यदि भवेत् तत्त्वमस्यादिवेदान्तवाक्यविचारेण, तदा स एव जीवः परः परमात्मा इति स्वयं विजानीयात् इति भावः ॥ ४० ॥

अथ बुद्ध्यात्मनोः परस्पराध्यासवशात् परस्परधर्मभानं इति दार्ढ्याय पुनराह—

चिद्बिंबसाक्षात्मधियां प्रसंगत-
स्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते
जडाजडत्वं हि चिदात्मचेतसोः ॥ ४१ ॥

चिद्बिंबेति। चिदात्मचेतसोः बुद्ध्यात्मनोः चिदाभासबुद्ध्योरित्यर्थः। अन्योन्यमध्यासवशात् परस्परं तादात्म्यारोपात् जडाजडत्वं जडस्य—चेतसोऽजडस्य आत्मनश्च परस्परधर्माध्यासेनेतरेतरधर्मवत्वं प्रतीयते चेतनस्यात्मनः जडत्वं जडस्य चेतसः चेतनत्वं भासते। अध्यासादित्यर्थः। अतएव ज्ञानाधिकरणकं आत्मेति तार्किका आहुः, जडोऽहमिति मूढव्यवहारश्च। ननु कुतो जडचेतनयोः परस्पराध्यासो भवति?। उच्यते। चिद्बिंबसाक्षात्मधियां प्रसंगतः पंचम्यां तसिः। चितो बिंबं चिदाभासः इत्यर्थः। अक्षैरिंद्रियैः सहितः साक्षः आत्मा नाम मनः धीरन्तःकरणं बुद्धिः इत्यर्थः, तासां चिद्बिंबसाक्षात्मधियां प्रसंगतः प्रकर्षेणातिशयेन संगात् सान्निध्यात् अथवा चित् आत्मा बिंबं यस्य एतादृशो यः चिदाभासः प्रतिबिंबभूतः च-साक्षात्मा सेंद्रियं मनः धीरन्तःकरणं चेति पूर्वपदे समासांतरं स्वीकार्यम्। ननु उक्तबिंबप्रतिबिंबभावे साक्षिचिदाभासभावे। किं मानं वर्तते—उच्यते। स्वसाक्षात्कृतिरेवात्र गमकं, "रूपं रूपं प्रतिरूपो बभूवे"-त्यादयः श्रुतयस्तु संत्येव तथाचोक्तं श्रीविद्यारण्यैः—'स्वादित्यदीपिते कुड्ये दर्पणादित्यदीप्तिवत्। कूटस्थभासितो देहो धीस्थजीवेन भास्यते ॥ अनेकदर्पणादित्य-

दीप्तीनां बहुसंधिषु । इतरा व्यज्यते तासामभावेऽपि प्रकाशते ॥' अस्य तात्पर्यं तु यथा सूर्यातपेन व्याप्ते कुड्यादौ निकटवर्तिप्रांगणे किमप्यंतरेण आतपन्यस्त-दर्पणानां प्रतिफलनानि नियतांतरेण पतंति तत्र आतपव्याप्तकुड्यादौ पूर्वं सामा-न्यसूर्यप्रकाशः प्रसरित एव विद्यते विशेषप्रकाशस्तु दर्पणप्रतिफलनानां पूर्व-प्रकाशात् स्पष्टतर एव द्रष्टुर्दृष्टिमवतरति । अत्र यथा सामान्यविशेषप्रकाशौ भित्तिकुड्यादौ संव्याप्तौ दृश्येते तद्वत् साक्षिकूटस्थभासितो देहः बुद्धिर्बिंबित-चिदाभासेन भास्यते, बुद्धिवृत्तीनां संधिषु चिदाभासाभावे च साक्षिचैतन्यं विना परापरवृत्तिसंबंधं तासां अभावं च को जानीयात्? अत एव एतत् सिद्धं भवति सामान्यः कूटस्थचैतन्यप्रकाशः साक्षी देहभासकः । विशेषस्तु बुद्धिर्बिंबित-चिदाभासप्रकाशः, ( प्रसंगतः प्रकर्षेण अतिशयेन संगात् सांनिध्यात् ) अध्यास इति भावः । यथा एकत्र वासात् अनलाक्तलोहवत् अनलेनाक्तं व्याप्तं यत् लोहं तत् अनल एव इति प्रतीयते अनलस्तु लोहाकृतिर्दृश्यते अत्रापि परस्पराध्यासः सान्निध्यात् ज्ञेय इति भावः ॥ ४१ ॥

उक्ताध्यासनिरासपूर्वकात्मानुभवार्थमुपायमाह—

गुरोः सकाशादपि वेदवाक्यतः
संजातविद्यानुभवो निरीक्ष्य तं ॥
स्वात्मानमात्मस्थमुपाधिवर्जितं
त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

गुरोरिति । गुरोः श्रोत्रियब्रह्मनिष्ठस्य सकाशात् सान्निध्यात् प्रणिपातपरिप्रश्न-सेवादिबहिरंगसाधनैस्तथा श्रद्धाजितेंद्रियत्वतत्परत्वाद्यंतरंगसाधनैः संपन्नो मुमुक्षुः वेदवाक्यतः वेदान्तवाक्यश्रवणमनननिदिध्यासात् श्रुतिशिरोभागाभ्यासेनेत्यर्थः । अभ्यासस्तु—'तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं । एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ॥' इति प्रकारेण कथितः पूर्वाचार्यैः, तस्मात्, अपि एवार्थे संजातवि-द्यानुभवः संजातो विद्यानुभवः सम्यक्ज्ञानानुभवो यस्य सः । श्रवणमनननिदि-ध्यासपरिपाकात् अपगताऽसंभावनाविपरीतभावनादिप्रतिबंधात् इहैव जन्मनि तं परमात्मानं उपाधिवर्जितं सकलक्लेशकारणाविद्योपाधेर्ज्ञानेन बाधितत्वात् तद्रहित-मित्यर्थः । आत्मस्थं स्वहृदयस्थं हृदयमेवात्मोपलब्धिस्थानत्वेनोक्तत्वात् अत्रात्म-

शब्देन हृदयमेवोक्तं, "यो वेदनिहितं गुहायां" इति श्रुतेः । ननु व्यापकस्यात्मनः कथं हृदयमेवोपलब्धिस्थानमुच्यते ? इति चेत् । उच्यते । यथा समस्तवसुधाधिपतिरपिरामः केनापि कारणेन अयोध्याधिपतिरिति व्यपदिश्यते, तथोक्तं गीतायां—"सर्वस्य चाहं हृदि संनिविष्टः" इति । हृदि सर्वस्यधिष्ठितमिति च । सर्वगतस्य तु सर्वदेशेषु विद्यमानत्वात् परिच्छिन्नदेशोऽपि कयाचित् अपेक्षया संभवति—"अर्भकौकस्त्वात्तपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च," इति सूत्रे, अणीयस्त्वादिगुणोपेत ईश्वरस्तत्र हृदयपुंडरीके निचाय्यः द्रष्टव्यः उपदिश्यते । "अणोरणीयान् महतो महीयान्" इति श्रुतिः उपाधिधर्माध्यासेनाणुत्वमपि व्यपदिशति न वस्तुतः । एतादृशं स्वात्मानं निरीक्ष्य वृत्तिव्याप्त्यानुभवगोचरं कृत्वा अयं अहं इति एवं अपरोक्षीकृत्य बुध्येति शेषः, अनंतरं आत्मगोचरं पराङ्मनइंद्रियाणां गोचरं विषयं बहिर्विषयाकृष्टचित्तेन्द्रियगोचरमिति भावः । अशेषं अविद्योद्भूतकर्तृत्ववासनासहितं जडं जगत् त्यजेत् तत्र नश्वरत्वेन मिथ्यात्वभावनया उदासीनो भवेत् विचरेत् न हि सत्यत्वदृष्ट्या आसक्तो भवेत् । न वा सकलजडवर्गस्य सर्वथा त्यागः संभवति बुद्धींद्रियदेहादीनामपि त्यागापत्तेः तत्त्यागे च प्रारब्धभोगावशेषभोगार्थं पुनरपि जन्ममरणापत्तेश्च ("प्रारब्धकर्मणां भोगादेव क्षय" इति निश्चितत्वात् "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्यते इति" श्रुतेः "भोगेन तु इतरे क्षपयित्वाथ संपद्यते" इति च ब्रह्मसूत्रात् ) अत एवोक्तं अस्मिन् जगति यथारब्धं उदासीनो भूत्वा वर्तनमेव तत्त्याग इति भावः । तथा च श्रुतिः "तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्विद्धनम्" इति अत्र मंत्रे उवटमहीधराद्याचार्यैस्तथैवोक्तत्वात् ॥ ४२ ॥

निरुपाधिज्ञेयात्मस्वरूपं श्लोकयुगुलेनाह—

प्रकाशरूपोऽहमजोऽहमद्वयो-
ऽसकृद्विभातोऽयमतीव निर्मलः ॥
विशुद्धविज्ञानघनो निरामयः
संपूर्ण आनन्दमयोऽहमक्रियः ॥ ४३ ॥

प्रकाशरूपोऽहमिति । अहं अहंवृत्तिगम्यः आत्मा प्रकाशरूपः स्वयंप्रकाशः आत्मा स्वयंप्रकाशः ज्ञानस्वरूपत्वात् व्यतिरेके घटवत् "नहि विज्ञातुर्विज्ञातेर्विप-

रिलोपो विद्यते" इति श्रुतिश्च, "ज्ञोऽत एव" इति सूत्रं; च कालत्रयाबाधितज्ञानरूपत्वमात्मनः कथयतः नहि तार्किकादिवत् आत्मरूपद्रव्यस्य ज्ञानं गुण इति स्वीकृतमद्वैतवादिभिः । तथा स्वीकारे च आत्मनः स्वयंप्रकाशकत्वं हीयेत तथा सति "यमेव भांतमनुभांति सर्वं यस्य भासा सर्वमिदं विभाति" इत्यादिश्रुतयो व्याकुप्येयुः । अतो नात्मा द्रव्यं भवितुमर्हति स्वयंप्रकाशत्वात्, यत् द्रव्यं तत् न स्वयंप्रकाशं यथा मृदादिः घटादि वा, आत्मा तु स्वप्रकाशो अन्यप्रकाशनिरपेक्षः इति भावः, सर्वस्थूलसूक्ष्मजगत् प्रकाशकत्वात्, ननु सूर्यादिज्योतिषां जगत्प्रकाशकत्वात् कथमुच्यते आत्मनः सर्वप्रकाशकत्वं? उच्यते । सूर्यचंद्रपावकविद्युत्तारकादीनां प्रकाशकत्वं तु न स्वतःसिद्धं । किंतु आत्मप्रकाशाधीनं तत्तेषां प्रकाशकत्वं, पंचविषयात्मकेऽस्मिन् जगति केवलं रूपविषयमेव प्रकाशयति सूर्यादिज्योतिः नेतरान् शब्दादीन् । अतो न सूर्यादिज्योतिः सर्वजगत् प्रकाशकं । किंच रूपप्रकाशनेऽपि न स्वतः समर्थत्वं सूर्यादिज्योतिषां, किंतु आत्मप्रकाशेनैव प्रकाशकत्वं, नहि गाढेऽन्धतमसि रूपव्यतिरिक्तानां विषयाणां ज्ञानं न भवतीति भणितुं शक्यं प्रत्यक्षतो रूपव्यतिरिक्तविषयाणां ज्ञानं ज्ञायते सर्वैः । अतो न प्रकाशकत्वं सूर्यादिज्योतिषां स्वतः । आत्मप्रकाशाभावे, न, कस्यापि वस्तुनः प्रकाशकत्वं दृष्टिपथमवतरति अत उक्तं, प्रकाशरूप इति अद्वयः सजातीयविजातीयस्वगतभेदशून्योऽजो जन्मरहितः । असकृद्विभातः न सकृत् विभातः न सकृत् विभातोऽसकृत् विभातः । एकवारविभातत्वं नाम प्रकाशकत्वं परप्रकाश्यस्य घटादेर्घटते । नहि सर्वदा विभातस्यात्मनः परप्रकाश्यत्वं । "न तत्र सूर्यो भाति न चंद्रतारकं" इत्यादि श्रुतेश्च । "न तद्भासयते सूर्यो न शशांको न पावक" इत्यादि श्रुतेश्च परप्रकाश्यत्वाभाव एव गम्यते । अतीव निर्मलः अविद्यावरणविक्षेपरहितः विशुद्धविज्ञानघनः निर्विषयज्ञानैकरूपः निरामयः दुःखशोकक्रोधभयादिरहितः संपूर्णः देशकालवस्त्वादिपरिच्छेदविवर्जितः आनन्दमयः आनन्दरूपोऽविक्रियः परिणामहीनः ॥ ४३ ॥

सदैवमुक्तोऽहमचिंत्यशक्तिमा-
नतींद्रियज्ञानमविक्रियात्मकः ॥
अनंतपारोऽहमहर्निशं बुधैः
विभावितोऽहं हृदि वेदवादिभिः ॥ ४४ ॥

सदैवमुक्त इति। अहं सदैव मुक्तः कालत्रयेऽपि मुक्तः नहि अविद्याकल्पितबंधभ्रमः पारमार्थिको भवितुमर्हति कल्पितत्वात् न शुक्तावज्ञानजनितरजतभ्रमः शुक्तिं वस्तुतो दूषयति अतएवोक्तं बंधरहितः मुक्तः इति कल्पितबंधभ्रमस्तु अज्ञानां, न तु तज्ज्ञानां कदापि भ्रान्तिरुत्पद्यते। अचिंत्यशक्तिमान् मनसा तर्कातीतमायाशक्तिमान् परमात्मा अहं—"अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेत्" इत्युक्तेः मायिकजगद्भावा यदि अचिंत्याः तर्हि तद्बीजं मायाशक्तिरचिंत्या इति किमु वक्तव्यं? तद्विशिष्टः अचिंत्यशक्तिमान् अहं—अतींद्रियज्ञानं इंद्रियाणां द्वैविध्यं प्रसिद्धमेव अंतरिंद्रियं बहिरिंद्रियाणि च, तत्रांतरिंद्रियं मनः अंतःकरणशब्देनोल्लिख्यते। बाह्यं दशेंद्रियवृन्दं। इंद्रियार्थसंन्निकर्षात् यस्य पदार्थस्य ज्ञानं जायते, स इंद्रियज्ञानविषयो भवति। आत्मा तु न तथा बाह्येंद्रियविषयाभावात्—"यतो वाचो निवर्तन्ते इत्यत्र बाह्येंद्रियातीतत्वमुक्तमात्मनः श्रुत्या" "आत्मा बाह्येंद्रियविषयो न भवति अतींद्रियत्वात् व्यतिरेके घटवत्" तर्हि अंतरिंद्रियविषयः स्यात् तदपि न मनसा चिंतनार्हं यत् वस्तु स्यात् तदेव अंतःकरणविषयं भवति अयं न तथा मनसोऽप्यगोचरत्वात् "यन्मनसा न मनुते" इति श्रुतेः अत उक्तं अतींद्रियज्ञानं अंतःकरणबहिष्करणज्ञानातिग इति भावः। अविक्रियात्मकः स्थाणुरिव विक्रियाशून्यस्वरूपः विकारस्तु सावयवपदार्थस्य संभवति, अयंतु निरवयव अतो हि अविक्रियात्मक इत्युक्तं विवादाध्यासित आत्मा अविक्रियः व्यापकत्वात् व्यतिरेके देहवत् अनंतपारः न विद्येते अंतः नाशः पारः अवधिश्च यस्य स देशकालवस्तुपरिच्छेदरहितः एतादृशोऽहं वेदवादिभिः वेदार्थ—विचारवद्भिर्बुधैः ज्ञानिभिर्हृदि भावितो ध्यातः॥ ४४॥

एवं भावनायाः फलमाह—

एवं सदात्मानमखंडितात्मना
विचारमाणस्य विशुद्धभावना॥
हन्यादविद्यामचिरेण कारकै
रसायनं यद्वदुपासितं रुजः॥ ४५॥

एवं उक्तप्रकारेण सदा आत्मानं अखंडितात्मना तद्विषयकधारावाहिमनसा तत्र प्रत्ययैकतानता ध्यानमित्युक्तत्वात् योगसूत्रे, अखंडितैकप्रत्ययेन मनसेत्यर्थः।

विचारमाणस्य ध्यायतः यद्यपि चरधातुः संचारार्थे वर्तते तथापि "उपसर्गेण धात्वर्थों बलादन्यत्र नीयते" इत्युक्तत्वात् व्युपसर्गेण अन्यार्थत्वं, धातूनां अनेकार्थत्वेन वा स्वार्थिकोऽण् च अथवा उक्तात्मविचारेणैव ज्ञानं भवेत् "विचाराज्जायते बोधः" इत्युक्तेः, एतादृशस्य साधकस्य विशुद्धभावना ब्रह्माकारांतःकरणवृत्तिरुदेति । समुदिताऽहं ब्रह्मास्मीति वृत्तिः कारकैः देहांतरप्रापककर्मभिः सहाऽविद्यामचिरेण शीघ्रं हन्यात् । नहि तत्र कालांतरं जन्मांतरमपेक्षते, तथा च ब्रह्मसूत्रं "ऐहिकमपि अप्रस्तुतप्रतिबंधे तद्दर्शनात् यदि प्रतिबंधाभावो भवेत् तदा इहैव जन्मनि ज्ञानप्राप्तिः संघटेत् भवेदित्यर्थः । उत्पन्ना च ब्रह्माकारांतःकरणवृत्तिरपरोक्षज्ञान-मित्यर्थः । जन्मांतरप्रापकप्रारब्धभिन्नसकलसंचितक्रियमाणकर्मभिः सहाऽविद्यां हन्यात् अज्ञानं सहकारकैर्बाधितं भवेदित्यर्थः, प्रारब्धसंचितक्रियमाणकर्मणां विचारस्तु पुरस्तात् विस्तरतो यथाप्रसंगं वक्ष्यामः । यद्वत् उपासितं सेवितं रसायनमौषधं रुजः रोगान् हन्ति तद्वत् सम्यक् ज्ञानमविद्यां हन्ति इति भावः ॥ ४५ ॥

अधुनाष्टांगयोगेन इतिकर्तव्यतामाह—

**विविक्त आसीन उपारतेंद्रियो**
**विनिर्जितात्मा विमलांतराशयः ॥**
**विभावयेदेकमनन्यसाधनो**
**विज्ञानदृक्केवलमात्मसंस्थितः ॥ ४६ ॥**

विविक्त इति । ननु श्रवणादिसाधनैर्निदिध्यासांते वृत्तिः अहं ब्रह्मास्मीति वृत्ति-रुदेति तदेव प्रत्ययैकतानतारूपं निदिध्यासनं ब्रह्माकारांतःकरणवृत्तिकारणं इत्युक्तं कथमधुनाष्टांगयोगेन इति कर्तव्यमुच्यते । बाढं, तथापि विद्यते हि योगस्य ज्ञानकारणत्वं तथोक्तं वासिष्ठे वसिष्ठेन—शिववचनं "द्वौ क्रमौ चित्तनाशाय योगो ज्ञानं च राघव । योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणं ॥ असाध्यः कस्यचित् योगः कस्यचित् तत्त्वनिश्चयः । प्रकारौ द्वौ ततो देवो जगाद भगवान् शिवः ॥" इति—तथा येषां श्रवणमनननिदिध्यासादिसाधनैश्च वृत्तिस्थैर्यं न घटते नाश्लिष्यति ज्ञानाग्निश्चित्तेन्धनं दाहाय, तेषामर्थे योगसाधनमेवोपायः साधीयान् । तेनापि बुद्धिवृत्तिनिरोधनं भवेत् जहाति च चित्तं स्वाभाविकौ लयविक्षेपौ उत्प-

मृत्तिकेत्येव सत्यं" इत्यादि श्रुत्या उपादानसत्ताव्यतिरेकेण कार्यसत्तायाः अभावात् कारणव्यतिरेकेण कार्यस्यासत्त्वात् । पंचीकृतभूतकार्यं व्यष्टिरूपं समष्टिरूपविराट्कार्यत्वात् तद्व्यतिरेकेण नास्ति, एवं समष्टिरूपविराट्कार्यं अपंचीकृतपंचमहाभूतकार्यत्वात् तद्व्यतिरेकेण नास्ति । तत्रापि पृथ्वी शब्दस्पर्शरूपरसगंधाख्यपंचगुणोपेता गंधेतरचतुर्गुणाप्कार्यत्वात् तद्व्यतिरेकेण नास्ति । ततश्चतुर्गुणा आपो गंधरसेतरत्रिगुणात्मकतेजःकार्यत्वात् तद्व्यतिरेकेण न संति, तदपि त्रिगुणात्मकं तेजः गंधरसरूपेत्तरद्विगुणात्मकवायुकार्यत्वात् तद्व्यतिरेकेण नास्ति, सोऽपि द्विगुणात्मको वायुः शब्दमात्रगुणकाकाशकार्यत्वात् तद्व्यतिरेकेण नास्ति, स च शब्दगुणकाकाशः । बहुस्यां प्रजायेयेति परमेश्वरसंकल्पात्मकाऽहंकारकार्यत्वात् तद्व्यतिरेकेण नास्ति, सोऽपि संकल्पात्मकोऽहंकारो मायेक्षणरूपमहत्तत्त्वकार्यत्वात् तद्व्यतिरेकेण, नास्ति तदपि ईक्षणरूपमहत्तत्त्वं मायापरिणामित्वात् तद्व्यतिरेकेण नास्ति । तदपि मायाख्यं कारणं जडत्वेन चैतन्येऽध्यस्तत्वात् तद्व्यतिरेकेण नास्तीत्यनुसंधानेन विद्यमानेऽपि कार्यकारणात्मके प्रपंचे चैतन्यमात्रगोचरत्वं अस्य जगतः निश्चिन्वन् योगी स्वरूपसाक्षात्कारेच्छुः विलापयेत् । अयमेव विलापनप्रकारः इति भावः । पूर्णः कालदेशवस्तुपरिच्छेदरहितः अवाप्तसकलकामतया पूर्णः इति वा ब्रह्मानंदे विषयानंदानामंतर्भावात् नाल्पानंदकामना तस्यावशिष्यते । तथोक्तं "यावानर्थ उदपाने सर्वतः संप्लुतोदके । तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥" इति स्मृतेश्च । चिदानंदमयः सच्चिदानंदरूपः अवतिष्ठते बाह्यं ईशनिर्मितं प्रपंचं आंतरं च वासनामयं मानसप्रपंचं विस्मरति इति भावः । किंचिदपि जडजातं न वेद न वेत्ति समाधिजसुखांबुधौ मग्नत्वेन सर्वत्र ब्रह्मदर्शनात् इति भावः ॥ ४७ ॥

अथ योगिनः समाधिसिद्धेः पूर्वं चिंतनप्रकारमाह—

पूर्वं समाधेरखिलं विचिंतये-
द्ओंकारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको
विभाव्यतेऽज्ञानवशान्न बोधतः ॥ ४८ ॥

पूर्वमिति । समाधेः सकलविषयासंगनिवृत्तिपूर्वकं ब्रह्माकारांतःकरणवृत्तिः समाधिरिति प्राञ्चः । समाधिः समतावस्था जीवात्मपरमात्मनोः ॥ ब्रह्मण्येव स्थिति-

र्यासौ..........इत्युक्तत्वात् ब्रह्मानुभवस्थितिः समाधिशब्देनोच्यते। ततः पूर्वं तदवस्थायाः प्राक् अज्ञानदशायां इत्यर्थः। अखिलं, सचराचरं, स्थावरजंगमात्मकं जगत् ओंकारमात्रं ओंकारो मात्रा प्रमाणं परिच्छेदकं यस्य तत्। ओंकारेण मीयते प्रमाणविषयीक्रियते वा ओंकारो मीयते अनया इति प्राज्ञः॥ विचिंतयेत्। किमर्थं ओंकारमात्रं जगत् इति चिंतनं इत्यत आह। तदेव जगत् वाच्यं ओंकारस्य "ओंकार एवेदं सर्वं" इति श्रुतेः। प्रणवो वाचको विभाव्यते कल्प्यते हि प्रसिद्धं इयं चिंतना अज्ञानवशात्। न बोधतः ज्ञानोत्तरं इयं भावना नावशिष्यते। ब्रह्मसाक्षात्कारस्य सर्ववृत्त्युपशमत्वात् इति भावः॥ ४८॥

तमेव प्रकारं विवृणोति—

**अकारसंज्ञः पुरुषो हि विश्वको**
**ह्युकारकस्तैजस ईर्यते क्रमात्॥**
**प्राज्ञो मकारः परिपठ्यतेऽखिलैः**
**समाधिपूर्वं न तु तत्त्वतो भवेत्॥ ४९॥**

अकारसंज्ञ इति। अत्रेयं व्यवस्था स्वीकृता वेदान्तिभिः। समष्टिव्यष्टिभेदेन देहानां द्वैविध्यं वरीवर्ति। समष्टिकारणशरीरं माया तदभिमानीश्वरः–व्यष्टिकारणशरीरमविद्या तदभिमानी प्राज्ञः। समष्टिसूक्ष्मशरीराभिमानी यदा स एव पूर्वोक्त ईश्वरो भवति तदा स हिरण्यगर्भसंज्ञां लभते। यदा व्यष्टिकारणशरीराभिमानी प्राज्ञः व्यष्टिसूक्ष्मशरीराभिमानी भवेत् तदा स एव प्राज्ञः तैजससंज्ञां भजते। यदा स एव हिरण्यगर्भः समष्टिस्थूलशरीराभिमानी भवेत् तदा स एव विराड्संज्ञां प्राप्नोति। व्यष्टिसूक्ष्मशरीराभिमानी तैजसो यदा व्यष्टिस्थूलशरीराभिमानी स्यात् तदा स एव विश्वसंज्ञां विंदते। एते जाग्रत्स्वप्नसुषुप्त्यवस्थायां तत्तदवस्थाभिमानिनो भवंति। प्रकृते अकारसंज्ञः पुरुषः। जाग्रदवस्थाभिमानी व्यष्टिस्थूलभूतो विश्वसंज्ञकः। अथ च स्थूलसमष्टिशरीराभिमानी विराड्संज्ञकः पुरुष अकारसंज्ञित इत्यर्थः। तथा स्वप्नावस्थाभिमानी व्यष्टिसूक्ष्मदेहाभिमानी तैजसः अथ च समष्टिसूक्ष्मशरीराभिमानी हिरण्यगर्भश्चोकारसंज्ञकः अखिलैर्वेदैः ईर्यते कथ्यते। तथा समष्टिकारणशरीराभिमानीश्वरः सुषुप्तिरूपावस्थाभिमानी व्यष्टिकारणाभिमानी विश्वको हि प्राज्ञो मकारः मकारसंज्ञः

परिपठ्यते । एतत् सर्वं समाधेः पूर्वं न तु तत्त्वतः तत्त्वज्ञानादनंतरं संभवेत् सर्ववृत्त्युपमर्दकत्वात् तस्येति भावः ॥ ४९ ॥

अथ विलापनप्रकारं द्वाभ्यामाह—

विश्वं त्वकारं पुरुषं विलापये-
दुपकारमध्ये बहुधा व्यवस्थितं ॥
ततो मकारे प्रविलाप्य तैजसं
द्वितीयवर्णं प्रणवस्य चांतिमे ॥ ५० ॥

बहुधा व्यवस्थितं स्थूलदेहनिबंधनं अकारवाच्यं विश्वं उकारवाच्ये तैजसे विलापयेत् । ततो प्रणवस्य अंतिमे वर्णे मकारे उकारवाच्यं द्वितीयवर्णं सूक्ष्माभिमानिनं तैजसं प्रविलाप्य विलापनं भावयित्वा ततो मकरमपि आत्मनि विलापयेत् इत्यग्रिमेण वक्ष्यते ॥ ५० ॥

मकारमप्यात्मनि चिद्घने परे
विलापयेत् प्राज्ञमपीहकारणं ॥
सोऽहं परं ब्रह्म सदा विमुक्तिमत्
विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

ततो मकारमपि मकारवाच्यप्राज्ञमपि कारणं कारणशरीराभिमानिनं परे सर्वोपाधिविवर्जिते चिद्घने ज्ञानस्वरूपे आत्मनि विलापयेत् इत्यर्थः । सोऽहं सर्वविलपनाधिष्ठानं परं मायातीतं ब्रह्म इति भावयेत् । तत् ब्रह्म सदा विमुक्तिमत् नित्यमुक्तं न केनापि धर्मेण बद्धं । ननु अहं पदार्थस्य रागद्वेषादिदोषमलिनस्य कथं सर्वधर्ममुक्तब्रह्मत्वभावना इत्याशंक्य आह—उपाधितः अमलः सर्वोपाधिभ्यो मुक्तः अत एव अमलः नित्यशुद्धबुद्धः । ननु कथं तथाभाने साधनं ? विज्ञानदृक् विज्ञानं निरस्तसर्वोपाधि यथा भवति तथा दृक् ब्रह्ममात्रप्रत्ययरूपा दृष्टिर्यस्य, तथा तदेव साक्षात्कारसाधनमितिभावः । श्लोकत्रयगतार्थस्य प्रमाणभूताः मांडुक्योपनिषद्गताः श्रुतयः सोयऽमात्माध्यक्षरमोंकारोऽधिमात्रं पादामात्रा मात्राश्च पादा अकारउकारमकार इति ॥ ८ ॥ जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रातेरादिमत्त्वाद्वाप्नोति ह वै सर्वान् कामानादिश्च भवति य एवं वेद ॥ ९ ॥ स्वप्न-

स्थानस्तैजस उकारो द्वितीयामात्रोत्कर्षादुभयत्वाद्वोत्कर्षात् ह वै ज्ञानसंततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद ॥ १० ॥ सुषुप्तस्थानः प्राज्ञो मकारस्तृतीयामात्रामितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद ॥ ११ ॥ अमात्रश्चतुर्थोऽव्यवहार्यः प्रपंचोपशमः शिवोऽद्वैत एव ओंकार आत्मैव संविशत्यात्मनात्मानं य एवं वेद ॥ १२ ॥" इत्युक्तानां मंत्राणामर्थ एव भगवता रामेणात्रोपदिष्टः स्वशिष्याय लक्ष्मणायेति द्रष्टव्यम् ॥ ५१ ॥

एवं समाधिसुखानुभवयुक्तस्य योगिनो लक्षणमाह—

**एवं सदा जातपरात्मभावनः**
**स्वानंदतुष्टः परिविस्मृताखिलः ॥**
**आस्ते स नित्यात्मसुखप्रकाशकः**
**साक्षाद्विमुक्तोऽचलवारिसिंधुवत् ॥ ५२ ॥**

एवमिति । एवमुक्तप्रकारेण सदा संततमखंडमित्यर्थः । जातपरात्मभावनः जाता उत्पन्ना परात्मनि भावना जीवात्म्यैक्यभावना यस्य सः, जीवपरमात्म्यैक्यानुभवसंपन्न इत्यर्थः । अत एव स्वानंदतुष्टः स्वात्मानंदसंतुष्टो न तु बाह्यविषयैः तेषां नश्वरत्वेन निरतिशयसुखजनकत्वाभावात् वैषयिकं सुखं तु परिणामविरसत्वात् । नहि तज्ज्ञैर्भोग्यत्वेन गण्यते, वस्तुतस्तु नहि विषयाणां सुखजनकत्वं । किंतु अनुकूलविषयोपलब्धौ सत्यां । प्रसन्नचित्तवृत्तौ स्वात्मसुखोद्भूतिरेव तत्रानुभूयते तदुक्तं भगवता विद्यारण्येन—

विषयेष्वपि लब्धेषु तदिच्छोपरमे सति ।
अंतर्मुखमनोवृत्तौ आनंदः प्रतिबिंबति ॥

अनुकूलविषयप्राप्तौ स्वात्मानंदस्य बुद्धौ प्रतिबिंबनात् अनेन लब्धविषयेण समभूत् सुखमिति भ्रांतिरेवाज्ञानां' न तथा ज्ञानिनः कदा भ्रमो भवति, अतो न बाह्यविषयैस्तुष्टः किंतु स्वानंदतुष्टः । तथोक्तं "आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥" अथ च ॥ "योऽतःसुखोंऽतरारामः" इत्यादिस्मृतेश्च ॥ अत एव परिविस्मृताखिलः स्वानंदलीनत्वेन परिविस्मृतमखिलं स्त्रीपुत्रदेहादि येन सः विस्मृतजगद्भाव इत्यर्थः । नित्यात्मसुखप्रकाशकः औपाधिकनामरूपराहित्येन नित्यं अखंडितं आत्मसुखं प्रकाशश्च ज्ञानं यस्य, स्वार्थे कः, विमुक्तः जीवन्मुक्त अचलवा-

रिसिंधुवत् यथा वर्षाकाले नद्यादिजलैरुदधिर्न वर्धते न वा ग्रीष्मे शुष्यति न व विकृतजलैर्विकृतो भवति। अचलः अनतिक्रांतमर्यादः निर्विकार इति वा स चासौ वारिसिंधुरिव ज्ञानी प्रारब्धप्रापितसुखदुःखैस्तद्वासनाभिर्वा न विकृतो भवति। तस्य मिथ्यात्वेनानासक्तत्वात् इत्यर्थः। एतादृशो ज्ञानी आस्ते इति ॥ ५२ ॥

योगनिष्ठस्य मद्भक्तस्यापि दृश्यो भवेयमहमित्याह—

एवं सदाऽभ्यस्तसमाधियोगिनो
निवृत्तसर्वेंद्रियगोचरस्य हि ॥
विनिर्जिताशेषरिपोरहं सदा
दृश्यो भवेयं जितषड्गुणात्मनः ॥ ५३ ॥

एवं इति। एवं सदा अभ्यस्तसमाधियोगिनः अभ्यासः पुनः पुनः तस्यैवावर्तनं अभ्यासः-तद्विषयीकृत अभ्यस्तः। यमनियमासनप्राणायामप्रत्याहारध्यान-धारणा-समाधि-इत्यष्टांगसहितः स एव योगः सः अस्य विद्यते अभ्यस्तसमाधियोगी तस्य। अथवा समाधिरेव योग अष्टांगसहित इति भावः। अभ्यस्तश्चासौ समाधियोगश्च सोऽस्यास्तीति तस्य इति वा। तत्र "स्थितौ यत्नोऽभ्यासः" तत्र स्वरूपावस्थिते द्रष्टरि चिदात्मनि चित्तस्यावृत्तिकस्य प्रशान्तवाहिता निश्चला स्थितिः तदर्थं यत्नो मनस उत्साहः स्वभावचांचल्यात् बहिः प्रवाहशीलं चित्तं अवश्यं रोत्स्यामि एवंविध आवर्त्यमानोऽभ्यासः। स तु "दीर्घकालनैरंतर्यसत्कारसेवितो दृढभूमिः" अनिर्वेदेन दीर्घकालसेवितः विच्छेदाभावेन निरंतरसेवितः सत्कारेण श्रद्धातिशयेन सेवितः दृढभूमिः विषयवासनया चालयितुमशक्यो भवति इति प्रकारेण अभ्यस्तः समाधियोगः सोऽस्यास्तीति। कथं तस्य अभ्यस्तसमाधियोगित्वं? हि यस्मात् निवृत्तसर्वेंद्रियगोचरस्य, निवृत्ताः सर्वेंद्रियाणां ज्ञानकर्मेंद्रियाणां गोचरा विषया यस्य, अनेन वैराग्यसंपन्नत्वं दर्शितं। द्विविधं हि वैराग्यं परं अपरं च तत्र यतमानसंज्ञा व्यतिरेकसंज्ञा एकेंद्रियसंज्ञा वशीकारसंज्ञा इति चतुर्धा अपरं वैराग्यं इदं संप्रज्ञातसमाधेरंतरंगसाधनं असंप्रज्ञातसमाधेर्बहिरंगसाधनं ज्ञेयं। तत्र पूर्वपूर्वभूमिजयेन उत्तरोत्तरभूमिसंपादनविवक्षया चतुर्थमेवासूत्रयत्। "दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञावैराग्यं," स्त्रियोऽन्नपानैश्वर्यादयो दृष्टा विषयाः, स्वर्गो, विदेहता, प्रकृतिलयः इत्यादयो वैदिकत्वेनानुश्रविका

विषयाः तेषूभयविधेषु सत्यामेव तृष्णायां विवेकतारतम्येन यतमानादित्रयं भवति, इह जगति किं सारं किमसारं इति गुरुशास्त्राभ्यां अवश्यं ज्ञास्यामि इत्युद्योगो यतमानं स्वचित्ते पूर्वं विद्यमानदोषाणां मध्येऽभ्यस्यमानविवेकेनैते पक्का एतेऽवशिष्टा इति चिकित्सकवत् विवेचनं व्यतिरेकं। दृष्टानुश्रविकविषयप्रवृत्तेः दुःखात्मकत्वबोधनेन बहिरिंद्रियप्रवृत्तिमजनयन्त्या अपि तृष्णाया औत्सुक्यमात्रेण मनस्यवस्थानं एकेंद्रियं । मनस्यपि तृष्णाशून्यत्वेन सर्वथा वैतृष्ण्यं तृष्णाविरोधिनी मनोवृत्तिः। ज्ञानप्रसादरूपा वशीकारसंज्ञा वैराग्यं। संप्रज्ञातसमाधेरंतरंगसाधनं। असंप्रज्ञातस्य तु बहिरंगसाधनं च भवति । तस्य तु अंतरंगसाधनं परमेव वैराग्यं तच्चासूत्रयत् "तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं" इति संप्रज्ञातसमाधिपाटवेन गुणत्रयात्मकात् प्रधानात् विविक्तस्य पुरुषस्य ख्यातिः साक्षात्कारः उत्पद्यते। ततश्चावशेषगुणत्रयव्यवहारेषु वैतृष्ण्यं यद्भवति तत्परं फलभूतं वैराग्यं तत्परिपाकाच्च चित्तोपशमपरिपाकादविलंबेन कैवल्यमिति। अत उक्तं निवृत्तसर्वेंद्रियगोचरस्य परापरवैराग्यसंपन्नस्येत्यर्थः। तदेव पुनः अग्रिमविशेषणाभ्यां विवृणोति–श्रोतृसौलभ्याय। ननु विषयनिवृत्तिस्तु काष्ठतपस्विनो व्रतिनो रोगिणश्च संभवति सत्यं–अत एवोक्तं विनिर्जिताशेषरिपोः विशेषेण नितरां जिता अशेषा रिपवो आदौ कामक्रोधलोभमदमत्सराद्यसुरवासना अशुभवासना—पश्चात् शुभापि वासना जिता येन तस्य । नहि व्रतितपस्व्यादीनां वासनानिवृत्तिर्विद्यते किंतु तपोव्रतादिसमाप्तिपर्यन्तं बलात् वासनानिरोधः क्रियते व्रतनिष्ठादिभिः। न तथा योगी, सवासनविषयनिवृत्तिस्तस्येति भावः। कुत एतत् जितषड्गुणात्मनः जितः षड्गुणः आत्मा येन सः, षड्गुणैश्वर्यसंपन्नपरमात्मा, योगाभ्यासपूर्वकभक्त्या स्ववशीकृतः येन। तस्य सदा दृश्यो अहं भवेयं अपरोक्ष इत्यर्थः । नाभक्तस्य हृदयस्थितोऽपि अनुभवगोचरतां आयामि। अयं भावः—निवृत्तसर्वेंद्रियगोचरस्य विनिर्जिताशेषरिपोर्जितषड्गुणात्मन इति विशेषणत्रयेण परापरवैराग्यसंपन्नस्य ब्रह्मसाक्षात्कार इति दर्शितं भवति। ॥ ५३ ॥

एवं वर्तमानस्य ज्ञानिनो हि प्रारब्धकर्मभोगांते ब्रह्मणि लयो भवतीत्याह—

ध्यात्वैवमात्मानमहर्निशं मुनि-
स्तिष्ठेत्सदामुक्तसमस्तबंधनः ॥

प्रारब्धमश्नन्नभिमानवर्जितो
मय्येव साक्षात्प्रविलीयते ततः ॥ ५४ ॥

एवं यमनियमआसनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपयोगेन अष्टांगयोगेनेत्यर्थः । वा श्रवणमननिदिध्यासादिना अहर्निशं सततं आत्मानं कूटस्थं ध्यात्वा आत्माकाराखंडितमनोवृत्त्या इति शेषः स्वानुभवगोचरतां नीत्वेत्यर्थः । विमुक्तसमस्तबंधनः निवृत्ताविद्याकार्यजन्यबंधः ज्ञानेऽनाज्ञानबाधात् इति भावः । सदा देहपातावधि अभिमानवर्जितः, मुक्तचिज्जडग्रंथित्वात् अभिमानाभावः सिद्ध एव तस्य । ननु ज्ञानोत्तरं किमर्थं ज्ञानिनो देहावस्थितिः? कर्तृत्वाद्यभावात् तस्य देहः कथं व्यवहरति? उच्यते । प्रारब्धमश्नन् "तदधिगमे उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" इति ब्रह्मसूत्रं । अस्यार्थः—ब्रह्माधिगमे सति उत्तराघशब्देन क्रियमाणं कर्मोच्यते । पूर्वाघशब्देन संचितकर्म व्यवह्रियते । क्रियमाणकर्मणः असंश्लेषः असंपर्कः संचितकर्मणस्तु नाशो ज्ञानाग्निना भवति परंतु प्रारब्धं कर्म नहि भोगं विना क्षीयते-प्रारब्धकर्मणां भोगादेव क्षयः । तद्भोगार्थं ज्ञानिनो देहः तिष्ठति ॥ "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभं ॥" इति स्मृतेः । ननु तदधिगमे इति सूत्रे केवलाघासंसर्गविनाशौ कथितौ, नहि शास्त्रीयस्य पुण्यस्याश्लेषविनाशौ उवाच भगवान् बादरायणः । तर्हि संचितक्रियमाणसुकृतयोरावश्यं भोगः स्यादेव । तदपि न "इतरस्याप्येवमसंश्लेषः पाते तु" इत्यग्रिमसूत्रे इतरस्य पुण्यस्यापि एवं पापवत् असंश्लेषविनाशौ चाकथयत् । कुत एतत्? । तस्य स्वफलहेतुत्वेन मोक्षप्रतिबंधकत्वात् एवं च अनारब्धकार्यसंचितक्रियमाणपुण्यपापानां नहि ज्ञाननिष्ठस्य संबंधो भवति । प्रारब्धं तु भोगं विना न क्षीयते, येन ब्रह्मज्ञानायतनमयं देहो निर्मितः तस्य फलोन्मुखत्वात् चालितकुलालचक्रवत् फलदानशक्तिरप्रतिबद्धा वर्तते ॥ "अवश्यंभाविभावानां प्रतिकारो भवेद्यदि । तदा दुःखैर्न लिप्येरन् नलरामयुधिष्ठिराः ॥" इति ज्ञानी प्रारब्धप्राप्तशुभाशुभफलमश्नन् भुंजानस्तद्भोगसमये तदभिनिवेशशून्यो निर्विकारचित्तश्चास्ते । ननु प्रारब्धज्ञानयोर्विरोधात् कथमुच्यते ज्ञानोत्तरं प्रारब्धावस्थानं? "क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति श्रुत्या, तथा च "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन" इति स्मृत्या च ज्ञानेन सर्वकर्मनाशोक्तेः कथं प्रारब्धावस्थानं ज्ञातुः

संभवेत् ? इति चेत्, उच्यते। नहि प्रारब्धज्ञानयोर्विरोधः भिन्नविषयत्वात्। तदुक्तं विद्यारण्यैः—"निर्बंधस्तत्त्वविद्याया इंद्रजालत्वसंस्मृतौ। प्रारब्धस्याग्रहो भोगे जीवस्य सुखदुःखयोः॥ विद्यारब्धे विरुध्येते न भिन्नविषयत्वतः॥ जानद्भिरप्यैंद्रजालविनोदो दृश्यते खलु॥" ज्ञानं जीवपरमात्मैक्यानुभवपूर्वकं जगन्मिथ्यात्वं बोधयति। प्रारब्धस्य केवलभोगमात्रेण चरितार्थता। न तत्र सत्य एव पदार्थोऽपेक्ष्यते—इति। अतो भिन्नविषयत्वात् न विद्यारब्धयोः परस्परविरोधः। ज्ञानेन प्रारब्धेतरकर्मणां नाशो भवति न प्रारब्धकर्मणामत्रार्थे स्मृतिसूत्राणामुपन्यासस्तु। नात्र विस्तरभयात् क्रियते, तस्य तावदेव चिरं यावन्न विमोक्षेऽथ संपत्स्ये ततः प्रारब्धभोगांते देहपातादूर्ध्वं साक्षात् मय्येव सर्वव्यापके सच्चिदानंदात्मनि प्रविलीयते लीनो भवति। "न तस्य प्राणा उत्क्रामन्ति, ब्रह्मैव सन् ब्रह्माप्येति।" घटनाशे घटावच्छिन्नाकाशो यथा महाकाशे एकीभवति घटरूपोपाधिनाशात्। तद्वत् अज्ञानोपाधिनाशे तत्त्वज्ञानेन, देहपातान्ते ब्रह्मीभावं प्राप्नोति ज्ञानी इति भावः॥ ५४॥

सर्वधर्मापेक्षया अयमेव धर्मो ज्यायान् इत्याह आदाविति—

**आदौ च मध्ये च तथैव चांततो**
**भवं विदित्वा भयशोककारणम्॥**
**हित्वा समस्तं विधिवादचोदितं**
**भजेत्स्वमात्मानमथाखिलात्मनाम्॥ ५५॥**

आदौ च मध्ये च तथैव अंततः सप्तम्यर्थे तसिः अंते च आदिमध्यावसानेषु भवं भवतीति भवः संसारः जगत् इति, जगद्वर्तिविकारपदार्थजातम् इत्यर्थः। तं भवं, भयं च शोकं च तयोः कारणं निदानं विदित्वा ननु कथमेतत् गम्यते भयशोककारणत्वं भवस्य ? तस्मिन्नपि भवे सुखोपलब्धेः पिपीलिकादिब्रह्मान्तप्राणिनां तत्रैव रममाणत्वात्। नहि भयशोककारणे कदापि सुखोपलब्धिः स्यात् अन्यथा सर्वैः प्राणिभिः संसारः त्यक्तः स्यात्। न तथा दृश्यते किं तु सेव्यते सोत्साहं मुहुर्मुहुः संसारः तर्हि कथमुच्यते भयशोककारणत्वमस्येति ? उच्यते। यतः सकलश्रुतिस्मृतिपुराणेतिहासादिषु तथानुक्तत्वात्। तथोक्तं च—

अर्थानामर्जने दुःखं तथैव परिपालने ।
नाशे दुःखं व्यये दुःखं धिगर्थान् क्लेशकारिणः ॥

मनसि प्रादुर्भूता अर्थेहा प्रथमं पुरुषं क्लेशयति ततश्च तत्पदार्थलाभार्थं आयस्यति पुरुषः । सायासेन अनुकूलप्रारब्धे सति लब्धे पदार्थे पुनर्नाशभयं संरक्षणयत्नश्च क्लेशयति चित्तं मनुष्यस्य । विधिवशात् नष्टे पदार्थे शोकः क्रमागत एव पुरुषं संतापयति । एवं सर्वसंसारवर्तिपदार्थानां रीतिः । न कोऽपि पदार्थः सुखोदर्क इति कैश्चित् अन्वभावि, न हि पदार्थानां सुखदाने शक्तिरस्ति ॥ स्वतः तामसत्वात् तेषाम् । नहि तमोगुणस्य स्वभावः सुखं । तर्हि कुतः तामसविषयेषु सुखमनुवर्तेत, यस्य पदार्थस्य यः स्वभावो विद्यते स न कदापि विपर्येति ॥ "नहि स्वभावो भावानां व्यावर्तेतौष्ण्यवद्रवेः" इत्युक्तेः । नहि स्वभावः पर्यनुयोक्तुं शक्यते इति भाष्योक्तेश्च । पदार्थस्वभावो यदि सुखं स्यात् न हि कदापि तस्मात् दुःखोद्भवः संभवेत् । अनुभूयते च मुहुर्मुहुः दुःखानुभवो जीवैः संसारे । अतः पदार्थो दुःखस्वभाव एव ॥ तथोक्तं गीतायां—"न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ॥ सत्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः ॥" इत्यनया स्मृत्या पदार्थमात्रस्य गुणमयत्वोक्तेः सर्वचराचराणां गुणत्रययुक्तत्वं स्पष्टमेव तत्र विषयाणां जाड्याप्रकाशस्वभावेन तामसत्वं स्पष्टमेव गम्यते, तस्मादेव दुःखहेतुत्वं क्रमागतमेव, कुतस्ततः सुखाशा ?, दृषदंकुरोत्पत्तिरिव निष्फला इति भावः । यदुक्तं न सुखोपलब्धिं विना प्राणिनः संसारेषु रममाणत्वं इति—तदपि असत्, अनुकूलविषयोपलब्धौ यत् तात्कालिकसुखानुभवो जन्यते तत् आत्मसुखमेवानुभूयते पुरुषेण । तद्यथा चित्तस्य त्रिधा वृत्तयः संति—शांता, घोरा, मूढाश्च ॥ "वैराग्यं क्षांतिरौदार्यं इत्याद्याः शांतवृत्तयः ॥ तृष्णास्नेहरागलोभावित्याद्या घोरवृत्तयः ॥ संमोहो भयमित्याद्या कथिता मूढवृत्तयः ॥" इष्टपदार्थान्वेषणे बहिर्निर्गता मनोवृत्तिः, इष्टपदार्थोपलब्धौ सैव अंतर्मुखा सती प्रसन्ना च भवति तत्र आत्मनः स्वरूपसुखांशः प्रतिबिंबति । न घोरमूढयोः वृत्त्योः बाहुल्येन रजस्तमस्वरूपत्वात् । अतः विषयेण सुखं संजज्ञे इति वृथैव मन्यते अज्ञैर्वस्तुतस्तु तत्र आत्मसुखोद्भूतिराविर्भवति । अतो न कदाचिदपि विषयेभ्यः सुखं संभवति । सुखभ्रान्त्या रमन्ते देहिनोऽज्ञाः तत्र । प्रत्युत विषयेंद्रियाणां अभावे अपि सुषुप्तौ निश्चयेन सुखानुभवात् विषयमयो भवो नहि सुखं दातुं शक्नोति इति सिद्धं । अत उक्तं भवं भय-

शोककारणं विदित्वा ज्ञात्वा इति विधिवादचोदितं समस्तं सकलं विधिवादैः चोदितं प्रेरितं काम्यं कर्म "दध्ना इंद्रियकामो" जुहुयात्, "ज्योतिष्टोमेन स्वर्गकामो यजेत," इत्यादिना–चोदितमित्यर्थः । तत हित्वा त्यक्त्वा काम्यकर्मणः फल-संबंधेन बंधकत्वात् त्याज्यत्वमिति भावः । ननु निष्कामकर्मणोऽपि पितृलोकफल-प्राप्तिद्वारा बंधकत्वमस्त्येव । बाढं । तथापि ईश्वरार्पणबुध्या कृतं कर्म परंपरया चित्तशुद्धिद्वारा मोक्षसाधनं भवति । अत उक्तं काम्यं कर्म त्यक्त्वा इति अखि-लानां समस्तजीवानां स्वस्वरूपभूतं आत्मानं साक्षिकूटस्थं भजेत ध्यायेत् तस्यैव निरतिशयप्रेमास्पदत्वतः इति भावः ॥ ५५ ॥

स्वाभेदभावनया परमात्मानं भावयन् नामरूपाविभागेन मय्येवैकतां प्राप्नोति इति सदृष्टांतमाह—

**आत्मन्यभेदेन विभावयन्निदं**
**भवत्यभेदेन मयात्मना तदा ॥**
**यथा जलं वारिनिधौ यथा पयः**
**क्षीरे वियद्व्योम्नि यथानिलेऽनिलः ॥ ५६ ॥**

आत्मनीति । आत्मनि आत्मस्वरूपे मयि सत्तारूपेण सर्वाधिष्ठानत्वात् सर्वव्यापके परमात्मनि–इदं स्वस्वरूपं जीवात्मानं अभेदेन ऐक्येन विभावयन् यदा तिष्ठतीति शेषः । तदा मया आत्मना परमात्मना अभेदेन वर्तते ऐक्यानु-भविता साधक इत्यध्याहारः, कल्पितस्याधिष्ठानाव्यतिरेकात्, नहि जीवो नाम स्वतंत्रवस्तु भवति, तस्य चित्प्रतिबिंबत्वेन अधिष्ठानव्यतिरेकाभावात्, मदभिन्नो भवति जीव इति भावः । ज्ञानी त्वात्मैव मे मतं इत्युक्तत्वात् । कथं मद्रूपो भवतीत्याहोत्तरार्धेन यथा येन प्रकारेण वारिधौ समुद्रे बाह्यं जलं प्रविष्टं सत् तन्मयतामेति भेदप्रतीत्यभावात्–"यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय, तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" इति श्रुतेः ।–"त्वयि त इमे ततो विविधनामगुणैः परमे । सरित इवार्णवे मधुनिलिल्युरशेषरसाः" इति च वेदस्तुतेः । यथा वा क्षीरे दुग्धे पयः दुग्धं क्षिप्तं सजातीयत्वात् तद्रूपमेव भवति यथा च व्योम्नि महाकाशे घटावच्छिन्नाकाशो घटध्वंसे घटरूपोपाधिनिरासेन प्रविशति न तत्र काऽपि भेदोपलब्धिर्लभ्यते,

यथा वा अनिलः नलिकाद्यवच्छिन्नो वायुः तन्निर्गमने अनिले महावायौ समरसत्वेन विशति । न पुनस्तत्पृथक् करणं कर्तुं शक्यते केनापि, तथैव जीवात्मापि पूर्वोक्तसाधनपरंपरापरिशीलनेन जाते ब्रह्मसाक्षात्कारे अज्ञानोपाधिनिरासेन भगवति समरसतयैव एकीभावमेति । न तत्र क्वापि भेदप्रतिपत्तिरस्ति । उभयोः चेतनत्वेनैकरूपत्वात् उपाधिभेदस्तु कारणबाधे कार्यबाधः । इति न्यायात् ज्ञानेन अज्ञानबाधे उपाधिनिवृत्त्या स्वत एव निवर्तत इति भावः ॥ ५६ ॥

प्राप्तपरमात्मैक्यस्य जीवन्मुक्तस्य जगति न क्वापि सत्यत्वभ्रांतिरवतिष्ठते इत्याह—

इत्थं यदीक्षेत हि लोकसंस्थितो
जगन्मृषैवेति विभावयन्मुनिः ॥
निराकृतत्वात् श्रुतियुक्तिमानतो
यथेंदुभेदो दिशि दिक्भ्रमादयः ॥ ५७ ॥

इत्थमिति । लोकसंस्थितः लोकवत्, यदि वा लोकसंस्थितः लोक्यते अवलोक्यते दृश्यते उपभुज्यते कर्मफलं यस्मिन् इति अनया व्युत्पत्त्या लोकशब्देन देहः उच्यते । तस्मिन् देहे सम् सम्यक् स्थितः देहोऽहमिति अध्यासरहितत्वेन देहसाक्षितया स्थितः यः ज्ञानी जीवः इति भावः । अज्ञवत् कर्मणि संस्थितः कर्मकर्ता ज्ञानी, ननु "देहाभिमाने गलिते विज्ञाते परमात्मनि । यत्र यत्र मनो याति तत्र तत्र समाधयः" इत्युक्तत्वात् ब्रह्मनिष्ठस्य जीवन्मुक्तस्य सर्वत्र ब्रह्मदर्शनात् कथं व्यवहारः संभवेत्? दृश्यते च ज्ञानिनोऽपि केचन कर्मकर्तारः इत्येतत् कथं घटत इत्याक्षेपः । बाढं । उच्यते । यद्यपि सम्यक् ज्ञानानुभवसंपन्नाः जीवन्मुक्ताः । तथापि तेऽपि प्रारब्धतंत्रा वर्तन्ते, प्रारब्धं त्वनेकविधं दृश्यते । भिन्नभिन्नकार्यत्वात् । भोगं विना तस्य न क्षयो भवति इति तु प्रागेवोक्तम् । तदुक्तं—"आरब्धकर्मनानात्वात् बुद्धानामन्यथाऽन्यथा । वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पंडितैः ॥ स्वस्वकर्मानुसारेण वर्तन्तां ते यथा तथा । अविशिष्टः सर्वबोधः समामुक्तिरिति स्थितिः ॥" इत्यादीनां प्रमाणानां सत्त्वात् ज्ञानिनां वर्तनं यथा प्रारब्धं भवत्येवेति इति निश्चितम् । ज्ञानिनश्च केचन

संगसीता उदासते । केचन प्रारब्धवशात् लोकसंग्रहार्थं कर्मकर्तारः संदृश्यंते ते च यथा—"कृष्णो भोगी शुकस्त्यागी नृपौ जनकराघवौ । वसिष्ठः कर्मकर्ता च पंचैते ज्ञानिनः समाः ॥" वासिष्ठे—"तत्त्वावबोधो भगवन् सर्वाशातृणपावकः । प्रोक्तः समाधिशब्देन न तु तूष्णीमवस्थितिः ॥" इत्यादिना तीव्रप्रारब्धवेगेन जीवन्मुक्ता अपि रामकृष्णवसिष्ठादिवत् जनकयाज्ञवल्क्यादिवच्च लोकसंग्रहार्थं कर्म कुर्वन्ति, एतावता न तेषां ज्ञाने तारतम्यं मंतव्यं, प्रारब्धभेदेन वर्तनभेदमात्रं प्रतीयते । लोकसंग्रहो नाम लोकस्य उन्मार्गनिवर्तनपूर्वकसन्मार्गप्रवर्तनं लोकसंग्रहः तदर्थं कर्म कुर्वन् स्वानुभवेन, श्रुतियुक्तिमानतः—"अतोऽन्यदार्तं," "नेह नानास्ति किंचन" "एकमेवाद्वितीयं ब्रह्म" इत्यादिश्रुतिभिः तथा—"आपेक्षिकं तु यद्रूपं तन्मिथ्येत्युपदिश्यते" । स्वतो यद्वस्तुतो नास्ति तत्कुतोऽन्यत् व्यपेक्षया "यद्धि यद्व्यतिरेकेण वस्तु नेहोपलभ्यते । तावदेवास्तु तद्वस्तु स्वप्नभूमिगवस्तुवत् ॥" तथा जगत् मिथ्या दृश्यत्वात् शुक्तिरजतवत् दृष्टनष्टस्वरूपत्वात् रज्जूरगवत् इत्यादिश्रुतिस्मृतियुक्तिप्रमाणैः निराकृतत्वात् जगत् मृषा इति विभावयन् निश्चयपूर्वकं पश्यन् मुनिः मननशीलो ज्ञानी यदि यदा इत्थं जीवात्मपरमात्मनोरैक्यं ईक्षेत पश्येत्, स्वानुभूत्या । तदा । दिशि प्राच्यादौ अन्यदिक्भ्रमः यथा न । च यथा इंदुभेदः एकस्मिन् चंद्रे द्विचंद्रभ्रमः न । तदेकत्वज्ञानेन द्विचंद्रभ्रमो निवर्तते । तथा ब्रह्म सत्यं जगन्मिथ्या इति ज्ञानेन जीवन्मुक्तः प्रारब्धवशात् व्यवहरन्नपि न भ्रमवशगो भवति अज्ञवत् इत्यर्थः ॥ ५७ ॥

पूर्वोक्तज्ञाने मदाराधनमेवोपाय इत्याह—

**यावन्नपश्येदखिलं मदात्मकं**
**तावन्मदाराधनतत्परो भवेत् ॥**
**श्रद्धालुरत्यूर्जितभक्तिलक्षणो**
**यस्तस्य दृश्योऽहमहर्निशं हृदि ॥ ५८ ॥**

यावदिति । अखिलं सचराचरं जगत् मदात्मकं मदधिष्ठानकं मद्विवर्तभूतं विवर्ताधिष्ठानयोः परस्परसापेक्षात्, नहि अधिष्ठानाभावे विभ्रमो भवितुमर्हति । नहि रज्ज्वभावे भुजंग इति वा धारेति वा विभ्रमो दृष्टपूर्वः । अतो मद्रूपाधिष्ठानं विना जगद्विवर्तावकाशो न संभवति । ज्ञानेन विनिवृत्ते

जगत्सत्यत्वभ्रमे सुवर्णालंकार इव मद्रूपमेव सर्वं विभाति । "वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं" इत्यादि श्रुतेश्च यावत् न पश्येत् न विलोकयति साधक इति शेषः । तावत्कालपर्यंतं मदाराधनतत्परो भवेत्, मम सगुणमूर्तेः भक्तिनिष्ठो भवेत् ममाराधननिष्ठः इति आराधनं भक्तिः—भक्तेर्लक्षणमुक्तं भक्तिसूत्रकारैः—'सा परानुरक्तिरीश्वरे' इति शांडिल्यसूत्रं तथा च नारदेन एवमेवोक्तं, सा त्वस्मिन् परमप्रेमरूपा—अस्यार्थः ईश्वरे उत्कृष्टा अनुरक्तिः सा भक्तिः तथा अस्मिन् ईश्वरे परमप्रेमरूपा भक्तिरिति नारदभक्तिसूत्रस्यार्थः । ननु श्रवणपूजनादिभक्तिरिति अस्माभिः स्वीकृतमेतावत्कालपर्यन्तं, कथमुच्यते अनुरागातिशयो भक्तिरिति । सत्यं साधने साध्यत्वारोपेण भवद्भिर्यत् स्वीकृतं पूजनश्रवणादिभक्तिरिति ओदनं पचतीति न्यायेन तदेव साधु तथैव भागवतेऽप्युक्तत्वात् । "श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनमि"त्यादि नारदभक्तिसूत्रेऽपि अग्रे तथैवोक्तत्वात्, 'तद्यथा कथादिष्वनुराग' इति पाराशर्यः—'पूजादिष्वनुराग' इति गर्गः, इति सूत्रद्वये भगवत्पूजादिष्वनुराग एव भक्तिरिति गर्गाचार्यौ वदन्ति । भगवान् बादरायणश्च कथाश्रवणादिष्वनुरागो भक्तिरिति ब्रवीति एवं अन्येऽपि आचार्याः भक्तिलक्षणे साधनेषु साध्यारोपं कृत्वा चाब्रुवन् परं च उच्यते पूजनश्रवणकीर्तनस्मरणादिषु अनुरागः प्रेम सैव भक्तिरिति । श्रवणकीर्तनादिकं तु ईशप्रेमपूर्वकमेव कृतं भक्तिशब्दार्हं फलदायि भवति ।—अतो भगवदाराधनं भागवतोक्तश्रवणकीर्तनादिप्रकारेण तावत्कुर्यात् यावत्सर्वं जगत् मद्रूपं न पश्यति साधकः इति । श्रद्धालुः भगवद्भक्तिरेव ज्ञानप्राप्तिसाधनमिति दृढविश्वासवान् "मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी" इति भगवत्पूज्यपादैरपि उक्तत्वात् ( विवेकचूडामणौ )—अत्युर्जितभक्तिलक्षणः अत्यूर्जिता अतिशयिता भक्तिः लक्षणं चिन्हं यस्य सः । प्रागुक्तलक्षणा भक्तिः द्विविधा परा चापरा च अपरा भक्तिरेव साधनभक्तिः साधकावस्थायां श्रवणपूजनसाधनमाश्रित्य क्रियमाणा अत्यूर्जिता क्रमेण कालेन च पक्वा भवति सैव भगवत्प्रसादात् ज्ञानोत्पत्तिद्वारेण फलरूपा भवति ॥ "तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।" इति भगवदुक्तेः । शुद्धप्रेमभक्तिपरिपाकात् संजाता फलरूपा भक्तिर्यस्य लक्षणं जायते एतादृशो भक्तः शुकसनकादिसदृशो वरीवर्ति स तु ज्ञानोत्तरं भगवत्प्रेम्णैव परमानन्दं अनुभवति । तस्य हृदि हार्दाकाशे अहर्निशं निरन्तरं दृश्यः अहं अनुभवगोचरो

भवामि ॥ विसृजति हृदयं, न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः । प्रणयरशनया धृतांघ्रिपद्मः इति भागवतोक्तेः इति भावः ॥ ५८ ॥

उक्तज्ञानस्य श्रुतिसंमतत्वं तदालोचकस्य च पापध्वंसं प्रतिपादयन्नाह—

रहस्यमेतत् श्रुतिसारसंग्रहं
मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीह बुद्धिमान्
स मुच्यते पातकराशिभिः क्षणात् ॥ ५९ ॥

रहस्यमिति । एतत् । आदौ स्ववर्णाश्रमवर्णिता इत्यारभ्य यस्त्वस्य दृश्योद्गमहर्निशं हृदि इत्येतदंतं यत् ससाधनं ज्ञानं उक्तं तद्रहस्यं गोप्यं यस्मै कस्मैचित् अनधिकारिणे अदेयमित्यर्थः । नहि एतत् स्वकपोलकल्पितमिति शंकनीयं यतः श्रुतिसारसंग्रहं श्रुतीनां वेदानां सारसंग्रहं तात्पर्यसमुच्चयं—'सारो बले स्थिरांशे चे'त्यमरोक्तेः । वैदिकज्ञानरूपबलस्य संग्रहमित्यर्थः । मया सर्वज्ञेन हे प्रिय, प्रेमातिशयविषयत्वात् परमभक्तस्य लक्ष्मणस्य प्रियेति संबोधनं हे लक्ष्मण, तव ते तवेति ग्रहणं तव मिषेण अन्येषामपि भक्तानामुपलक्षणार्थं, अनेन जननमरणसंसारसंतापं तरिष्यसि इति निश्चित्योदितं कथितं तथा यः कोऽपि एतत् आलोचयति सम्यक् विचारयति सः निर्गतसकलसंशयविपर्यासादिदोषः बुद्धिमान् अप्रस्तुतप्रतिबंधे सति इह जन्मन्यपि ज्ञानवान् सन् क्षणात् ज्ञानप्राप्तिसमकाल एव पापराशिभिः संचितक्रियमाणपापपुण्यसंचयैः मुच्यते मुक्तो भवति "तदधिगमे उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" तथा "इतरस्याप्येवमसंश्लेषः पाते तु" इति सूत्राभ्यां हि एतत् पूर्वमेव स्पष्टोक्तत्वात् इति दिक् ॥ ५९ ॥

पुनः पुनः प्रसंगमापाद्य दार्ढ्याय तदेव जगन्मायामयत्वं सहाऽऽशिषा प्रतिपादयति भगवान्दाशरथिः—

भ्रातर्यदीदं परिदृश्यते जगत्
मायैव सर्वं परिहृत्य चेतसा ॥
मद्भावनाभावितशुद्धमानसः
सुखी भवानंदमयो निरामयः ॥ ६० ॥

भ्रातरिति । हे भ्रातः हे बंधो लक्ष्मण, यदि यदीति यदर्थे–यदि यत् इदं जगत् परिदृश्यते परमार्थसत्यतया भासते तदिदं सर्वं जगत् मायैव, नत्वन्यत् मायामयत्वात् जगतः इति भावः । इति निश्चित्य चेतसा परिहृत्य तत्र औदासीन्यं कृत्वा मिथ्यात्वेनेत्यर्थः । मद्भावनाभावितशुद्धमानसः मद्भावनया मदैक्यभावनया भावितं शुद्धं मानसं यस्य मद्रूपमना इत्यर्थः । निरामयः उपाधिजन्यदुःखनिरासात् निर्दुःखः अत एवानंदमयः आनन्दरूपः स्वार्थे मयट् विकाराद्यर्थकस्य मयटोऽत्रासंभवात् सुखी सर्वदा सुखानुभवसंपन्नो भव इति आशिषं प्रयुङ्क्ते भगवान्रामः ॥ ६० ॥

अधुना स्वोपासकस्य लोकपावनत्वमाह—

**यः सेवते मामगुणं गुणात्परं**
**हृदा कदा वा यदि वाऽगुणात्मकम् ॥**
**सोहं स्वपादांचितरेणुभिः स्पृशन्**
**पुनाति लोकत्रितयं यथा रविः ॥ ६१ ॥**

य इति । यः मद्भक्तः कदा वा यदा कदाचित् हृदा शुद्धमनसा–"हृदा मनीषा मनसाभिक्लृप्तो" 'य एतद्विदुरमृतास्ते भवन्ति ।' इति कठश्रुतेः । अगुणं वस्तुतः सत्त्वादिगुणविवर्जितं निर्गुणं इत्यर्थः । तथा गुणात्परं मायातीतं । ननु अगुणमित्यनेन निर्गुणत्वे सिद्धे पुनः गुणात्परमिति विशेषणं किमर्थं उपात्तं उच्यते । अगुणमित्यनेन सत्त्वादिगुणत्रयराहित्ये सिद्धेऽपि तत्कारणमायातीतत्वं तावता न सिध्येत् । नहि कार्यराहित्ये कारणातीतं तद्ब्रह्म तद्ब्रह्मेत्यनुमातुं शक्यं अत उक्तं गुणात्परं त्रिगुणानां साम्यावस्था माया अव्यक्तशब्देनाभिधीयते श्रुत्या तथा— "महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥" गुणशब्देन अव्यक्ताख्या माया गृह्यते तस्याः परं निर्गुणं निर्मायं एवंविधं मां यः सेवेत उपास्ते । निर्गुणोपासनापरो भवति इति भावः । यदि अथवा गुणात्मकं गुणा भक्तवात्सल्यरिपुहननदयादाक्षिण्यसर्वज्ञत्वविविधविभूतिशालित्वजगदुत्पत्तिस्थितिलयकारित्वादिकल्याणगुणादयः आत्मा स्वरूपं यस्य नहि रामकृष्णाद्यवतारमंतरेण भक्तवात्सल्यादिगुणोपलब्धिः संदृश्यते अतः सगुणं भक्तानुग्रहाय आत्ततनुं घनःश्यामं रामं मुनिजनविश्रामं लीलया विहिताचारं

धनुर्धरं मां सेवते सगुणोपासको यो जायते इति भावः। सगुणोपासनास्तु अनेकविधा उपनिषदादिषु प्रकाशिताः ताः तत एव ज्ञेयाः। ननु सगुणनिर्गुणोपासनयोः फले कोऽपि विशेषोऽस्ति न वा? उच्यते। यद्यपि अंतिमफले ब्रह्मानुभवलक्षणे न विशेषः, तथापि तदनुष्ठाने सौलभ्याऽसौलभ्यकृततारतम्यं तु विद्यते एव—"पामराणां व्यवहृतेर्वरं कर्माद्यनुष्ठितिः। तत्रापि सगुणोपास्तिः निर्गुणोपासनं ततः॥" इत्यत्र पंचदश्यां यद्यपि उत्तरोत्तरविज्ञानसामीप्यात् तारतम्यं व्यज्यते तथापि निर्गुणोपासनायाः सगुणोपासनानुष्ठानेऽस्ति सौलभ्यं—॥ क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसाम्। अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते इति भगवदुक्तेः।—साधकस्य भक्तस्य चित्तालंबनमूर्त्यादिप्रतीकसद्भावात्। तत्रैव महतां प्रायशः प्रवृत्तिदर्शनात् सगुणोपासनमेव सुलभं—"तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।" इति प्रकारेण सगुणोपासकानां भक्तानां जन्ममरणसंसारात् उद्धरणे स्वत एव भगवता बद्धपरिकरत्वात् सगुणोपासनस्य सुकरत्वं तु निर्विवादं सिद्धम्। विद्यारण्यस्वामिभिः निर्गुणोपासनाश्रैष्ठ्यं यद्यप्यभ्यधायि तथापि सगुणोपासनायाः परंपरया तदेव निर्गुणोपासनप्राप्यं फलं प्रत्यपादि महानुभावैः सद्भिः। अनुष्ठानसौलभ्यात् ज्ञानप्राप्तिद्वारेण परमात्मैक्यफलदायित्वात् तदेव वरमिदानींतनानां साधकानां इति मन्यामहे वयं, एवं द्विविधोऽप्युपासकः सोऽहमस्मि न मद्व्यतिरिक्तोऽस्ति सः। 'ज्ञानी त्वात्मैव मे मतम्।—प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इत्युक्तत्वात्। स्वपादांचितरेणुभिः स्वपादलग्नधूलिभिः लोकत्रयं स्वर्गादिलोकत्रयं स्पृशन् यदृच्छयेति भावः। पुनाति अज्ञानध्वांतनिराकरणेनेत्यर्थः। यथा रविः सूर्यः स्वकिरणैर्जगत्स्पर्शमात्रेण पुनाति पावयति तद्वत्॥ ६१॥

एतद्ग्रन्थार्थालोचनासमर्थस्य केवलपाठमात्रतोऽपि महत्फलं इत्याह—

**विज्ञानमेतदखिलं श्रुतिसारमेकं**
**वेदांतवेद्यचरणेन मयैव गीतम्॥**
**यः श्रद्धया परिपठेद्गुरुभक्तियुक्तो**
**मद्रूपमेति यदि मद्वचनेषु भक्तिः॥ ६२॥**

विज्ञानमिति। वेदान्तवेद्यचरणेन वेदान्तैर्वेद्यं ज्ञेयं इतरेभ्यो ज्ञापितं वा चरणं चारित्र्यं, 'जगज्जन्मादि यस्य, "यतो वा इमानि भूतानि जायन्ते येन जातानि

जीवन्ति यत्प्रयन्त्यभिसंविशन्ति;" 'भीषाऽस्माद्वातः पवते;' "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः" इत्यादिश्रुतिभिः तदेवोपपादितं। एतादृशेन मया साक्षात्स्वमुखेन सर्वज्ञेन जगज्जन्मादिचारित्र्यविशिष्टेनेत्यर्थः । एतत् वर्णाश्रमाद्याचारेण चित्तशुद्धिः ततः शमादिसंपत्तिः साधनचतुष्टयसंपन्नत्वेन गुरूपसदनं तस्मात् महावाक्यविचारतो ब्रह्मानुभवसंपन्नता ततः सकलदुःखोपरतिश्च सकलजडजातस्य मिथ्यात्वेन परवैराग्यतो फलभूता भगवद्भक्तिः तया "सकलमहमिदं च वासुदेवः" इत्यनुभवः इत्येतत् श्रुतिसारं निगमसारभूतं विज्ञानं अपरोक्षानुभवजनकं गीतं कथितं परमप्रेम्णा इति भावः । गुरुभक्तियुक्तः गुरुप्रेमाभिनिविष्टचित्तः यः कोऽपि मद्वचनेषु मदीयवचनेषु भक्तिः यदि स्नेहानुगामी विश्वासो भवेत् विश्वासपूर्वकप्रेमयुक्तः– भक्तिमान् श्रद्धया परिपठेच्छब्दतः इति शेषः, सोऽपि मद्रूपमेति इति किमु वक्तव्यं । अर्थज्ञानपूर्वकपाठके मद्रूपमेति इति काकुः । भगवद्वचनप्रेमहीनस्याऽभक्तस्याऽश्रद्धालोर्न भगवद्रूपता–इति तु क्रमत एव निष्पन्नं अत एवोक्तं श्रुतौ–'यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥' देवे गुरौ च भक्तियुक्ताय वेदान्ता अनुभवगोचरा भवन्ति तस्माद्गुरुदेवभक्तो भवेदित्यर्थः ॥ ६२ ॥

श्रीरामचंद्रार्पणमस्तु ।

इति–रामगीतायाः शुक्लोपाह्वशंकरतनूजबालकृष्णविरचिता
बालमधुकरी व्याख्या संपूर्णा ॥

भक्त्या श्रीसद्गुरुं वंदे भालचंद्रं सदाशिवम् ।
यत्कृपालेशमात्रेण परिपूर्णो मनोरथः ॥ १ ॥

आर्याः—यद्यपि बहुदोषाढ्यं मद्व्याख्यानं तथापि रघुराजः ।
तत्क्षंतुं योग्यो मे सुतवात्सल्यात् पितेव पुत्रागः ॥ २ ॥

अनुष्टुप्—विप्रेण बालकृष्णेन त्र्यंबकक्षेत्रवासिना ।
शुक्लेन चार्पिता सेयं व्याख्या विघ्नहराय ते ॥ ३ ॥

शुभं भवतु ।

श्रीत्र्यंबकेश्वराय नमः

# अभिप्रायपत्रिका

( १ )

श्रीमद्वेदशास्त्रसंपन्नबालकृष्णशास्त्रिप्रणीता रामगीताया बालमधुकरीनाम्नी टीकेयमन्तरान्तरा समालोचिता। रामगीतार्थं जिज्ञासूनां वेदान्तशास्त्रीयसिद्धान्ततत्त्वमजानानानां सौलभ्येन तदर्थावबोधायाऽस्या भूयानुपयोगः स्यादिति मन्ये। एवं बालमधुकरीति स्वनाम्नोऽन्वर्थतां प्रदर्शयन्ती चेयं मुद्रणावस्थां प्राप्य प्रसिद्धिमायाखित्याशासे.

माघ शु॥ ५ शुक्रवार शके १८५६

(—पुण्यपत्तनस्थविद्वत्परिषदध्यक्षमहामहोपाध्यायः)

अभ्यंकरोपाह्व वासुदेवशास्त्री

( २ )

श्रीविश्वेश्वरो विजयते

श्रीत्र्यंबकक्षेत्रवासिना बालकृष्णशास्त्रिणा वेदान्तरत्नेन निर्मिता श्रीरामगीताया बालमधुकरीनाम्नी टीका मया यथावसरं कियत्स्थलं दृष्टा। तावतैवेयं साधु (साध्वी) प्रतीयते यत् व्याख्येयं सरलमसृणमंजुलमनोहरा विदुषां मोदप्रदा, अन्तेवासिनां च वेदान्तप्रक्रियाशालितया तत्पारिभाषिकशब्दार्थज्ञानजनकतया च बहूपकारिका, व्याख्याकर्तुः पांडित्येन परितुष्टोऽहं सर्वान्तर्यामिणमभ्यर्थये यदियं व्याख्या विद्वज्जनसमादृता स्यादित्यलं बहुज्ञेषु बहूक्तेनेति विरमामि

श्री. पद्मनाभशास्त्री

सर्वतंत्रस्वतंत्रषड्दर्शनाचार्यः

काशी भिखारीदासकी गल्ली

## ( ३ )

### श्रीकृष्णः शरणं मम

श्रीत्र्यंबकक्षेत्राभिजनेन वेदान्तरत्नेन श्रीमता श्रीबालकृष्णशास्त्रिणा विरचितेयं अध्यात्मरामायणीयोत्तरकाण्डस्थश्रीरामगीताया बालमधुकरी–नामिका सरला संस्कृतटीकाऽद्वैतसाधनसिद्धान्तप्रतिपादनपरा मयाऽवलोकिता, यत् किंचित् स्थलदर्शनेनैव स्थालीपुलाकन्यायमनुसृत्यास्य व्याख्यातुः परिश्रमं वैदुष्यं च प्रशंसन्नाशासे यदियं व्याख्या भुवि प्रख्याता विदुषां विद्यार्थिनां च तोषावहा, श्रीमतो मर्यादापुरुषोत्तमस्य रामचंद्रस्य प्रसादात् प्रणेतुर्नाम यशस्तातिं चिरस्थां विधास्यतीति—

विदुषाम् वशंवदः

**श्रीगोपालशास्त्री क्षैमधरिः**

( दर्शनकेसरी, साहित्याचार्य व्याकरणशास्त्री न्यायतीर्थः प्रधानमंत्री श्रीसंस्कृत-साहित्यसमाजस्य काशीस्थस्य )

लक्ष्मीकुण्ड, वाराणसी.

---

## ( ४ )

### अभिनन्दनम्

अध्यात्मरामायणस्योत्तरकाण्डगता भगवता श्रीरामचंद्रेणोक्ता श्रीलक्ष्मणंप्रति श्रीरामगीता जगति प्रसिद्धा, अत्र वेदान्तस्य दुरूहविषयाणां प्रतिपादनं स्वल्पाक्षरेषु विद्यते, येषां परिज्ञानेन सर्वोऽपि जनः कृतार्थो भवति यद्यपि इयं प्रचलिता प्रायः सर्वत्रैव वर्तते तथापि तद्गतभावानां सारल्येन मनसि प्रवेशं विधात्री काचिदपि शोभना संस्कृतटीका न वर्तते, यस्या आवश्यकता बहु-कालादासीत् सुधीसमाजे, अयं परमहर्षविषयोऽस्ति यत् साऽवश्यकता त्र्यंबक-क्षेत्रनिवासिना समधीतसंस्कृतविद्येन श्रीमता शुक्लाऽवटङ्केन बालकृष्णशास्त्रिणा पूर्णा कृता, शास्त्रिवरेण लिखितेयं टीका मधुकरीनाम्नी, मधुकरी यथा नाना-पुष्पेभ्यः सारमादाय निश्चिते स्थाने स्थापयति तथा तेन आमयाकुलानां मङ्गलं विदधाति, तथैव शास्त्रनिवहसमुद्धृता सरलोपादेयसंस्कृतशब्दैः प्रकटीकृत-मनोहरभावा भवभ्रान्तानामाकुलानां जनानां नूनमनामयं विधास्यतीति कृतप्रति-

श्रवोऽहं इमां मधुकरीं सुश्राव्यां मनोहरां पण्डितानां पुरः संस्थाप्य नूनं बालकृष्णशास्त्रिमहाभागो बभूव विद्वद्धौरेयाणामपि मनोमोदावहो नात्र संदेहः, आशाऽस्ति सुरभारती सेवनपरा मनीषिणोऽवश्यमेवास्याः शोभनं सन्मानं करिष्यन्ति ।

श्रीरामचंद्ररचितां समधीत्य नूनम्
गीतामिमां मधुकरीसहितामपीच्याम्
श्रीबालकृष्णविदुषेकृतधन्यवादो
भूमौ भविष्यति चिरं सुजनश्च विद्वान्

जातानन्दपरम्परः व्याकरणाचार्यः संस्कृतसंपादकः

**कालीप्रसाद शास्त्री**

श्री. अयोध्यावास्तव्यः त्र्यंबकक्षेत्रप्रवासी

---

(५)

## श्रीपांडुरंगो विजयते

पंडितवर्य शुक्ल बालकृष्णशास्त्रिभिः संपादितां बालमधुकरीं नाम रामगीताटीकामालोच्य तस्याश्च कांश्चित् बिन्दून् विलिहतां यदि मोमोत्तिनोन्तरंगम्, तर्हि ये नाम समग्रां एतां भूयो भूयो निपास्यन्ति ते हि अखण्डं ब्रह्मानंदमेवानुभविष्यन्तीति नास्ति नः सन्देहगन्धोऽपि आशास्महे च अचिरादेव प्रकाश्यतां नेष्यन्ति साहाय्यदानेन महोदारा एतामिति च

इति फाल्गुने सुदि पंचम्यां १८५६ शाके.

**धारूरकरोपाह्वो भगवच्छर्मा**
पौण्डरीक निवासी.

---

(६)

## 'श्रीमद्रुक्मिणीजानिः पाण्डुरङ्गो' विजयतेतमाम्

अवालोकि, किलास्माभिर्बालमधुकरी व्याख्या रामगीतायाः स्थाली-पुलाकन्यायेन। प्राणायि च श्रीमत्र्यम्बकेश्वराङ्घ्रयब्रुण् मधुमिलिन्दायमानमानसैस्त्र्यम्बके-

श्वरक्षेत्रनिवासिभिर्वेदान्तरत्नैश्शङ्कर तनुजनुभिः शुक्लोपाह्वैर्बालकृष्णशास्त्रिभिः । एतस्मिन् कराले कलिकाले वितथभवजुषां पूर्वकर्मजनुषां पुंसामज्ञानतिमिरापहतचक्षुषां समुद्धृतौ प्रभविष्णू रामगीता, तथाप्यापाततोऽप्यर्थमजानानामिदानींतनानां कतिचिज्जडानां जनानां कुतस्तरां संजाघटिष्यति तद्रहस्यागमः ? इति कृत्वा परोपकृतिकृतये ह्यकारि साधिष्ठः प्रयत्न एषः । विचित्रा खलु एषा मधुकरी, न केवलं षड्भिः पदैरेवालङ्कृता किन्तु परः सहस्रसंख्याकैर्विराडिव । अपि च स्वयं मधुपानमकुर्वाणापि सज्जनान् पाययति स्वाध्यात्ममधु । रामगीतातत्त्वानवबोधमलापहा स्याच्चवेत्ति नास्त्यत्र सन्देहलेशोऽपि शुक्लगुणवैशिष्ट्यसत्त्वादिति सहृदयैराकलनीयम् । सौकर्येण ग्रन्थस्य याथातथ्यविज्ञानेऽयमेव सध्रीचीनः पन्थाः । प्रवचनकाराणामतीव गुणावहा । झटित्यनया सर्वोपकारक्षमयामुद्रितया भाव्यम् । इत्येतदर्थं श्रीपाण्डुरङ्गचरणारविन्दयोः प्रणिपनीपातसाहस्रीपुरस्सरं प्रार्थयामह इत्यलं पल्लवितेनेति शम् ।

फा. एकादश्यां सुदि भृगुवासरे शाके रसभूतवसुब्रह्ममिते ।

श्रीपाण्डुरङ्गकृपाभिलाषुकः कालभैरवोपाह्वश्शङ्करशास्त्री पौण्डरीकक्षेत्रनिवासी
अ. भा. वर्णाश्रमस्वराज्यसंघाध्यक्षः ।

---

## ( ७ )

### श्रीशः शरणं

श्रीमन्नासिकक्षेत्रतः

श्रीत्र्यंबकक्षेत्रमधितिष्ठता शुक्लोपाख्यबालकृष्णशास्त्रिणा वेदान्तरत्नेन संप्रणीता श्रीमदध्यात्मरामायणरहस्यसंवेदिन्याः श्रीरामगीताया व्याख्यैषा मया मध्ये मध्ये अनुवाचिता । अद्यावधि नैतादृशी व्याख्या रामगीतायाः यथार्थावबोधं तत्सहैव वेदान्तशास्त्रे पारिभाषिकं च प्राक्रीयिकं च प्रवेशं चाधिविंदेताधीतकाव्यकोषोऽनधीतवेदान्तसिद्धान्ततंत्रोऽपीति मन्यामहे सम्यक्करोतु चेयं बालमधुकरीप्रदानं रामगीतातत्त्वार्थमवगन्तुकामेभ्यः । स्थाने खल्वेष यत्नो ग्रंथकर्तुः पांडित्यं व्याख्यानकौशलं च विदुषां संतोषास्पदं । अस्याः संग्रहेण सफलीकुर्वन्तु ग्रंथकृतां परिश्रमं विद्यार्थिनो विद्वांसश्चेति । शिवम् ।

भवदीयः

**वैदिकतिलको वारे अण्णाशास्त्री.**

---

# श्रीजानकीजानिर्विजयतेतराम्

राजकीयसंस्कृतमहाविद्यालयगवालियरस्थाध्यापकानामभिमतम्

श्रीः ।

श्रीमदध्यात्मरामायणान्तर्गतायाः श्रीरामगीताया नाम्ना "मधुकरी"व्याख्याऽऽपाततोऽवलोकिता नासीदद्यावधि सारल्येन गीतापाठकानां हृदयेषु वेदान्ततत्त्वसन्निवेशविधायिनी काचन टीका, आसीच्च बहोः कालाद्रामगीतार्थजिज्ञासूनां वेदान्तशास्त्ररहस्यमजानानानां सौकर्येण तदर्थावबोधायावश्यकतैवं विधाया व्याख्यायाः । सेयं न्यूनता त्र्यंबकक्षेत्रनिवासिना वेदान्तदर्शनानुरागिणा शुक्लोपाख्यबालकृष्णसूरिणा "मधुकरी"त्यन्वर्थाभिधां व्याख्यां प्रणीय पूरितेति महान् प्रमोदविषयः सुरभारतीरतचेतसां सुमनसाम् । अस्याष्टीकाया गीतार्थजिज्ञासूनां भूयानुपयोगः स्यादिति मन्ये ।

विदुषां वशंवदः—

( गावलपत्तनस्थराजकीयसंस्कृतमहाविद्यालयप्रधानाध्यापकधर्मशास्त्राचार्यः )

**मुसलगांवकरोपाह्व सदाशिव शास्त्री.**

१०।९।३५ लश्कर–गवालियर

**घाणेकरोपाह्वोऽनन्तरामशास्त्री च**

व्याकरणाचार्यः ।

राजकीय संस्कृतमहाविद्यालयगवालियर.

**पं. श्रीमधुकान्त झा ज्यौ. आ.**

**पं. श्रीसतीन्द्रचन्द्र भट्टाचार्य न्यायाचार्यः**

**पं. गङ्गाप्रसादशास्त्री व्या. आ.**

---

## ( श्रीशं वंदे )

इदमेवास्माकमपि गीतार्थालोचनेन आमोदसंपरिप्लुतानां रामशास्त्रिणां श्रीमदद्वैतेश्वरसंस्कृतपाठशालाध्यापकवरेण्यानां वैद्योपनाम्नां आशयवचः दुस्तरतरसंसारसागरतरणोपायभूतश्रीरामगीताश्लोकार्थव्याख्यानमिषेण श्रीपार्वतीकांतत्र्यंबकराजानुगृहीतानां त्र्यंबकक्षेत्रनिवासिनां शास्त्रधुरंधराणां शुक्लोपाह्वबालकृष्ण-

शास्त्रिणां शास्त्रसरणिमनुपलभमानेष्वपि मंदप्रज्ञेषु प्रवचनोत्साहिषु उपकारबुध्या अयत्नतः बोधोपलब्धये बहुप्रयत्नरचितागीतार्थव्याख्याविद्वज्जनसंग्रहार्हा केनापि प्रयत्नेन प्रसिद्धिमानेया, तेन ते शास्त्रिणोऽपि मोदंताम्, कृतार्थतां च प्राप्नुवंतु ।

श्रीक्षेत्रनासिकस्थाद्वैतेश्वरसंस्कृत-
पाठशालाध्यापकवरेण्यो वैद्योपनामा
**रामशास्त्री**

दिष्ट्या वर्धसे श्रीमन् !

विलोक्य भवता कृतां सुसरलैः पदैः संहिताम्
रघूत्तमवचश्चयाशय सुधारसं चिन्वतीम् ।
श्रुतिस्मृतिवचो भृतां 'मधुकरीं' यथार्थाभिधाम्
विचक्षण ! विलक्षणामुदयि ! जायते चेतसि ॥
तर्ककर्कशवाक्चक्रकृतप्रचुरविक्रमैः ।
कौतुकेनावलोक्यैषा सरलाप्यर्थभाविनी ॥

इंदूर-सं. म. विद्यालयः
मि. अधिक भाद्र शु. ९ मी सौम्यदिनम्
सं. १९९३

इति विदुषोऽनुनयते
**टिल्लूपाभिधो विनायकशर्मा**

---

## "श्रीनाथप्रसन्न"

श्रीत्र्यम्बकेश्वरक्षेत्रनिवासिभिर्वेदान्तरत्नैः शुक्लोपाव्हबालकृष्णशास्त्रिभिरध्यात्मरामायणस्योत्तरकाण्डस्थरामगीताया वेदान्तशास्त्रानवगाहमानानाज्ञनानामुपकारार्थं विरचिता, या, नाम्ना मधुकरी टीका साऽवलोकिता नान्यावरिवर्तते‍ऽस्याः सदृशी सरला सरसा च टीका. यथा श्रीरामेण स्वभ्रात्रे लक्ष्मणाय गुह्यातिगुह्यं यत्स्वात्मरहस्यं प्रकटितं, तथैषां मधुकर्याख्यया टीकया वेदान्ताब्ध्युदरस्थं ब्रह्मरत्नमन्विष्य प्राकृतजनानाङ्करतलीकृतमिति मन्यामहे. तेनातीव प्रमुदितैरस्माभिरेभ्यो बहुशो धन्यवादाः प्रदीयन्ते. रामतत्त्वजिज्ञासुभिस्संग्राह्या चैषा टीकेत्यस्माकं सम्मतिः ॥

**शेण्डे इत्युपाह्व शंकरशर्मा**
राजोपाध्याय. ग्वाल्हेर

---

२८१७७। संस्कृत।१५२



श्रीमद्भिः शुक्लोपाह्वबालकृष्णशास्त्रिभिः अध्यात्मरामायणान्तर्गतश्रीरामगीताया व्याख्यानरूपा बालमधुकरी नाम टीका विरचिता, सा च सर्वथौपनिषद्सिद्धान्तानुरोधिनी सरलसरलपरमोपकारिणी चेति तामवलोकयतां नः प्रतीतिरिति मन्यते

महामहोपाध्यायो

**माधवशास्त्री भाण्डारी**

व्याकरणवेदान्ताचार्यः साहित्यमीमांसातीर्थः

प्राच्यमहाविद्यालयप्रधानाध्यापकः ता. १-७-३६ लवपुरीय ( लाहोरस्थ )

---

श्रीत्र्यम्बकक्षेत्रवासिभिर्वेदान्तरत्नसमलङ्कृतैः शुक्लोपाव्हैर्बालकृष्णशास्त्रिभिर्निर्मितां बालमधुकरीति संज्ञिकां श्रीरामगीतायाः सुलभत्वेनार्थवैशद्यकारिणीं टीकां विहंगमदृष्ट्या तत्र तत्र पर्यालोच्य संमुदितमना अहमेतद्विषयजिज्ञासूनां मन्दधियामपि सुखबोधाय सा स्यादिति स्वाभिप्रायं सहर्षं प्रकटयामि.

ता. ७।७।३६ आ. वा॥. ३
इन्दूरनगरम्

पुरुषोत्तम नारायणशास्त्री काशीकरः
पूर्वोत्तरमीमांसातीर्थः

श्री. हिकेश ग्रंथसंग्रहालय ... जि. सातारा

प्रथम

